श्रीगणेशायनमः॥ स्कंदउवाच माहात्म्यंकथितंसम्यक्नदीनामुत्तमोत्तमं गंगादीनांमुनिश्रेष्ठाः किमन्यच्छ्रोतुमिच्छ
य १ ऋषयऊचुः सर्वोत्तमंयदिक्षेत्रंतीर्थंचैकत्रविद्यते उत्तरंदेवतंचापितन्नोवदमहाते २ सूतउवाच आगस्त्यादि
महर्षीणांवचःश्रुत्वाथषण्मुखः ध्यात्वातादृग्विधंक्षेत्रंतीर्थंदेवंनदृष्टवान् ३ स्कंदउवाच नाहंतथाविधंक्षेत्रंतीर्थं
देवतमेवच ध्यायन्वच्मिमुनयः सर्वोत्तरंसुदुर्लभं ४ तदागच्छतगच्छामोगिरिजावल्लभंभवं प्रष्टुमेतेमहाप्र
भंकैलासनिलयंप्रभुं ५ आश्रयंतुममाप्यत्रप्रश्नार्थाधिगमेमहत् जायतेमुनिशार्दूलाः सहिनोवक्ष्यतेशिवः
६ सूतउवाच श्रुत्वाऽमुनिभिः सार्द्धंजगामशिखिवाहनः निलयंदेवदेवस्यकैलासंसुरपूजितं ७ तस्मिन्ने
वमवानीचः क्रीडितोद्यानकेवने दृष्ट्वतयातिमत्तासः सुरासुरनमस्कृतः ८ देव्युवाच देवदेवजगन्नाथभक्ता
नुग्रहकारक श्रममेकंममविभोप्रसादाद्वक्तुमर्हसि ९ कुरुक्षेत्रान्नैमिषाच्चकेदारान्पुष्करादपि काश्याः श्री
पर्वताच्चैवगुहारण्यात्तथैवच १० अन्येभ्यः सर्वतीर्थेभ्योविद्यतेयदिशंकर सर्वोत्तरंदेवतंवतीर्थंक्षेत्रंमहाफ
लं ११ एकत्रवितयंचैवविशिष्टंसुरपूजितं वक्तुमर्हसिमेशंभोभवान्यत्रसुसंस्थितः १२ सूतउवाच तदात्त
योः समीपंतुस्कंदोमुनिगणान्वितः एत्यानंदाद्वंदतोपितरोजगतःप्रभू १३ तमुत्थाप्यपरिष्वज्यमूर्ध्न्यवघ्रा
यशंकरः पार्वत्यपितथात्रेम्णापरांप्रीतिमवापतुः १४ अंकेकुमारमारोप्यऋषीणांपरमासने दिदेशपरमप्री

तोवाक्यंचेदमथाब्रवीत् १५ किमागमनकृत्यंतेपुत्रशीघ्रंत्वदुच्यतां एतेमुनिगणाः सर्वेकिमपेक्ष्यास्त्यागताः
१६ इत्युक्तोदेवदेवेनस्कंदोथपरमासने आसीनःप्रणतःप्रह्वस्तदोवाचमहद्वचः १७ स्कंदउवाच ऋषीणांज
गतांनाथतत्प्रसादान्मयाधुना पुराणंकीर्तितंदिव्यंस्कांदंपरमपूजितं १८ क्षेत्राणांचैवतीर्थानांदेवतानांपृ
थक्पृथक् श्रुत्वामाहात्म्यमधुनाप्रष्टोहंमुनिभिःप्रभो १९ सर्वोत्कृष्टंयदिक्षेत्रंतीर्थंचापिमहाफलं तादृग्विधं
दैवतंचविद्यतेचेद्ब्रवीहिनः २० ध्यातापिनमयादृष्टंक्षेत्रंतीर्थंतथैवच सर्वोत्कृष्टदैवतंचमुक्तिमुक्तिफलप्रदं
२१ तद्वदस्वमहाबाहोकृपयाभक्तवत्सल एतेश्रोतुंमुनिगणाःभवंतंपर्युपासते २२ ईश्वरउवाच इदानी
ममेवार्थंमात्वापृष्टोस्मितेनच वक्ष्यामिशृणुतत्त्वेनपुत्रेतिप्रियसीतिच २३ अतीवगुह्यंतत्क्षेत्रंनास्तिकेभ्यः
कदाचन नषंढेभ्योदांभिकेभ्योपाषंडेभ्यश्चसुंदरी २४ सकामकर्मकर्तृभ्यानवक्तव्यंपरंहितत् सत्यः सर्वोत्त्य
यंतीर्थः सर्वदेवसमाश्रितः २५ सर्वक्षेत्राधिकोमन्येदक्षादृष्टफलप्रदः गौतम्याउत्तरेतीरेसर्वापेक्षमहाफलः २६
दक्षिणेपिहितत्तीरेयत्क्षेत्रंचैवसुंदरी कृष्णःपुरामुनिर्यत्रयमुनादीपसंभवः २७ तपस्तप्त्वामहाघोरंवेदव्यास
तमाप्तवान् सोयंकृष्णगिरिर्नामसर्वपापप्रणाशनः २८ आश्रमास्तत्रसर्वेषांमुनीनामूर्ध्वरेतसां राजर्षीणांच
सर्वेषांमहापुण्यफलप्रदाः २९ तस्याश्चैवतटेदेवीवंजरायास्तथैवच गोदावर्यास्तटेचैवसंख्यांकोवेत्तिसुंदरी ३०

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मेम्याश्चैवतटेदेवि दक्षिणेतीर्थमुत्तमं आस्तिक्षेत्रंदेवतंचसर्वोत्कृष्टंमहाफलं ३१ पर्मवीरानदीयत्रकरवीरकुब्जांकु
रैः संयुक्तासंगतामेम्यातस्माद्योजनमात्रतः ३२ पौंडरीकमितिख्यातंतीर्थक्षेत्रंचपूजितं पांडुरंगश्चतत्रास्तेमूर्ति
मान्दैवतोत्तमः ३३ आद्यकल्पेष्टाविंशतिदापरांतेचषण्मुख पुंडरीकइतिख्यातस्तपस्तेपेसुदुष्करं ३४ पुष्क
रिण्यास्तटेरम्यास्वाश्रमंसुरपूजितं भक्त्यापितृभ्यांशुश्रूषांकुर्वन्नासीन्मुनिः सदा ३५ भोज्यरुच्चावचैर्लेह्यैः फ
लैश्चविविधैरपि पित्राः स्नानैः सदाचारैः प्रीतिसंजनयन्मुदा ३६ तस्यैवंकुर्वतः पूजांपित्रोरहरहः प्रिये परितुष्टो
भवेद्देवोगोपीजनमनःप्रियः ३७ गोवर्धनगिरौरम्येगोगणांचारयन्विभुः श्रमार्तमृषिमभ्यागादरांदातुंसुरे
श्वरः ३८ नानारत्नप्रभोद्भासिसिक्थमौक्तिविराजितः मकराकृतिरम्याभ्यांकुंडलाभ्यांविभूषितः ३९ पदकेन
विराजमानःश्रीवत्संधारयन्विभुः जानीवसुंदरःसौम्योवल्मीकोत्तमहांगदः ४० दिग्वासाश्चातिसौम्यश्चलंतः
सत्वेणवेष्टितः त्रिवृद्वलीकृतेनेशः कटिबंधेनराजितः ४१ कटिमालंब्यतिष्ठंस्त्रिवृद्वल्यात्रसंयुतः क्षुद्र
काशिक्यनङ्वाभ्यामूरुभ्यांचातिशोभितः ४२ चित्रपत्रांशुनिर्मित्रवस्त्रंसोदक्षिणेविभुः जलजंपांचजन्यंचगदां
रक्षंचधारयन् ४३ चक्रंचरेखारूपेणदंडमात्रधरोहरिः कटिविन्यस्तहस्तोथतस्थौऋषिसमीपतः ४४ धृता
गोयष्टिमूरुभ्यांमोहयन्निवतंऋषिं तंदृष्ट्वासऋषिर्दैवीबभूवानंदनिर्भरः ४५ पुंडरीकसुरेशस्यचारुतांप्रेक्ष्य

भामिनि चक्षुषांतःप्रवेश्यैनंहृदिस्थितासुहुर्मुहुः ४६ स्निह्येयमुतजिघ्रेयमितिवाकुलतांययौ तस्यतंभावमाज्ञा
यपांडुरंगोहसन्निव ४७ इदमूचेवचस्तत्रकारुण्येनावलोकयन् श्रीभगवानुवाच आगतोहंमुनिश्रेष्ठतांद्रष्टुमि
हविस्मयात् ४८ शुकस्यवामदेवस्यभारद्वाजस्ययोगिनः अस्मिन्कृष्णगिरौविप्रतिष्ठेतिकृत्तिवाश्रमः ४९ रत्न
नातिदूरंवैवंजरागौतमीतटे नगश्चसिकथंतत्रकथमात्रैवतिष्ठसि ५० गंगायमुनयोर्मध्येयथांतर्वेदिरुत्तमा गोदा
वंजरयोर्मध्येतथाकृष्णगिरिःशुभः ५१ क्षेत्राणिनिकटेसंतिकथमात्रैवतिष्ठसि ईश्वरउवाच इत्युक्तोश्रीमुकुंदेन
पुंडरीकोमुनीश्वरः ५२ गोविंदंप्राहसद्भक्त्यापितरौदर्शयन्निव ऋषिरुवाच इदंक्षेत्रमिदंतीर्थमिमेचसकलासुराः
५३ त्वंवाशिवोवाब्रह्मावायद्वासूर्योविनायकः देवोदेवीचयाकाचीसर्वंतत्पितरौमम ५४ श्रीभगवानुवाच आग
तोहंवरान्दातुंप्रीत्यातेमुनिसत्तम पित्रोराराधनाद्ब्रह्मन्प्रसन्नोस्मिनसंशयः ५५ इत्युक्तोदेवदेवेनततोनत्वा
सुरेश्वरं समर्च्यविभुमीशानंतुष्टावगरुडध्वजं ५६ पुंडरीकउवाच जयजयजगन्नाथमहाविष्णोसुरेश्वर भक्ता
नंददेवेशपणतार्त्तिविनाशन ५७ व्यक्ताव्यक्तस्वरूपस्त्वंविश्वरूपनिरंजन गुणज्ञनिर्गुणाधारनिर्गुणात्मन्नमो
स्तुते ५८ त्राहिमांदेवदेवेशकृपयाभक्तवत्सल यदिप्रसन्नोसिभवान्ब्रह्मार्चितपदांबुज. ५९ अनेनचारुरूपेण
त्वयास्थेयमिहप्रभो मन्नाम्नैवभवेत्सत्रंविश्रुतंसुरपूजितं ६० मुक्तिमुक्तिपदंदृष्ट्वांसर्वक्षेत्रोत्तमंभवेत् तीर्थंचापि

तथादेवसर्वतीर्थोत्तमंभवेत् ६१ मूर्योत्तमापिदेवेशासर्वदेवोत्तमप्रभो वात्सल्यंमयिकारुण्यात्सर्वेसर्वोत्तमंभवेत् ६२
श्रीभगवानुवाच एवमस्तुनिवत्स्यामितवप्रीत्यासुनेसदा अत्रैवतीर्थमध्येहंतवनामांकितेद्विज ६३ भीमस्वेदसमु
द्भूताभैमीभगवतःप्रिया प्रीत्यागततवस्तेत्रंतीर्थंचस्रावयिष्यति ६४ पूर्वामुखोमुनिश्रेष्ठपश्चिमाभिमुखस्तथा यु
ष्मत्प्रकटश्चाहमत्रवत्स्यामिसुव्रतः॥६५॥इतिश्रीस्कंदपुराणेउत्तरसंहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादे त्र
यस्त्रोध्यायः॥१॥ ॥श्रीशंकरउवाच॥ एवंतस्यवरंदत्वातत्रैवस्थितवान्हरिः मध्येतीर्थस्यविलसद्दलोज्ज्वलितपी
ठके १ नानारत्नैर्विलसतिमंडपेमौक्तिकान्विते अच्युतादिसमायुक्तेचतुर्द्वारसमन्विते २ उपास्यमानोमुनिभिः
सिद्धैर्योगिभिरच्युतः पुंडरीकेणचतथाक्षेत्रपालेनसंयुतः ३ अर्द्धयोजनविस्तीर्णंतदर्धायामसंततं तत्क्षेत्रंसर्व
फलदंविष्णोर्ममचवल्लभं ४ पुष्करात्त्रिगुणंपुण्यंकेदारात्षड्गुणंभवेत् वाराणस्याःचातगुणंअनंतंश्रीगि
रेरपि ५ क्षेत्राणांपरमंक्षेत्रंतदेतद्विप्रकीर्त्तितं पांडुरंगंमहाविष्णुंमुक्तिमुक्तिफलप्रदं ६ तत्रस्थित्वार्चयान्ये
नंप्रीत्यासुरनमस्कृतं अन्यक्षेत्रस्यदेवानामर्चनेयत्फलंलभेत् ७ तदत्रलभतेमर्त्यः सहस्रगणमर्चन षष्ठि
वर्षसहस्राणिदिव्यदेवतदर्चनात् ८ यत्फलंलभतेमर्त्यस्तत्फलंसकृदत्रहि अनेकक्षेत्रवासाद्विवासस्तत्रप्रशं
स्यते ९ एकरात्रोषितःसोपिसायुज्यंलभतेध्रुवं दुर्लभंमानुषंजन्मतत्रापच्युतसेवनं १० वासोपितद्देवक्षे

त्रेस्मिन्दुर्लभगतः तथाचमातृशुश्रूषाजराजन्मविनाशिनी ११ दुर्लभाखलुमर्त्यानांतद्दासोत्रदुर्लभाः॥
कालेप्रातिथेःपूजायथाध्यानरतिःसदा १२ सिकप्रमाणमप्यन्नमस्मिन्क्षेत्रेददातियः तदन्नमेरुणातुल्यम
क्षय्यंचफलंलभेत् १३ अणुप्रमाणंस्वर्णंचरजतंवास्वशक्तितः अस्मिन्क्षेत्रेतुयोदद्यात्सोनंतफलमश्नुते १४
कंबलानपियस्तत्रवर्षाकालेप्रयच्छति आयुरारोग्यमैश्वर्यंकीर्तिंचलभतेनरः १५ वासोभिश्चित्रकादीनिस्वे
तान्यपिद्विजातये अस्मिन्क्षेत्रेतुयोदद्यात्सनमस्योदिवौकसां १६ देवाश्चजन्मबीजंतिकर्मक्षमोसुरेश्वरी स
ह्यपांडुरीकस्यंविष्णुद्रक्ष्यामृत्युत १७ दशमात्रेचदेवेशोऽनंतानंतप्रदायके संसारसागरंघोरंउत्तरंतुत
रेमहि १८ पितॄनुद्दिश्ययत्किंचिद्दीयतेक्षयदाफदा श्राद्धादिकंचापिनरैस्तदेषामक्षयंभवेत् १९ मोदंतेपित
रस्तस्यनृत्यंतिचपितामहाः अपिनःस्वकुलेजातः पांडुरंगंव्रजेत्क्वयः २० प्रमादाद्यापिदेवेशियस्यदृष्टिंभवे
न्मुखे पांडुरंगस्यदेवस्यसर्वेषः सुरसत्तमैः २१ सर्वथासालिकंभावंकुर्वन्नेवसुरेश्वरि याक्षतेपांडुरीकस्यवि
ष्णोसुरनमस्कृते २२ येनकेनाप्युपायेनराजसींकुरुतेमतिं भक्तानांभक्तिसुलभामामृतेपरमेश्वरी २३ क्षेत्रे
देवस्यपुरतः क्षेत्रपालःसुपूजितः अध्यास्तेप्रथमंपुंभिर्दृश्यःफलकांक्षिभिः २४ द्वात्रिंशदक्षरयुतमंत्रेणाराधितःप्रिये अभीष्टान्सकलान्कामान्सददातिनसंशयः २५ पूर्वद्वारेस्थितादेवीब्रह्मपत्नीवरानना दृश्याप्

जनीयाचनमस्कार्याविशोषतः ३६ दशाक्षरस्यमंत्रस्यमूर्तिःसापरमेश्वरी तेनसंपूजितानृणामभीष्टफल
दायिनी ३७ सिद्धानामीश्वरीदेवीदक्षिणद्वारमाश्रितः विष्णुनास्थापितःप्रीत्यानारदोलिंगमूर्तिमान् ३८
दक्षिणेवेणुमुद्रोकोनमस्कार्याप्रयत्नतः षडक्षरेणमंत्रेणपूजितःसुरसिद्धिदः ३९ विष्णुप्रीतामहादेवीदेवस्त
त्रसमासते पंचकोद्यःसमाख्यातानीराजनकृतोदयः ३० भूम्यामंतःसुरेशानिविष्णुमाराधयंतिताः सद
द्यापितद्भूमोधूपस्यप्रतिदृश्यते ३१ विष्णोःक्रीडनकंस्थानंनानाश्चर्ययुतंहितत् हरिणाक्रीडितंतत्रक्रीडंत्य
मरवल्लभाः ३२ श्रीपादोत्तरसंलग्नोशिलाएवेसुपूजितो नौनलापुरुषःपूजांकृत्वाचैवयथाविधि ३३
लभतेसकलान्कामान्सायुज्यंचनसंशयः सिंचनक्रीडनादीनितत्रशस्तानिभामिनि ३४ दध्यान्नैस्तेजपक्रीड
शाद्भुलक्रीडनानिच पश्चिमेचस्थितादेवी द्वारमुत्तमपूजितः ३५ भुवनाधीश्वरीनृणामभीष्टफलदायिनी॥
संपूज्याप्रेक्षितव्याचनमस्कार्याविशोषतः ३६ एकाक्षरस्यमंत्रस्यमूर्तिःसापरमेश्वरी तेनसंपूजितानृणांअ
भीष्टफलदायिनी ३७ उत्तरद्वारमाश्रित्यदुर्गाभगवतीस्थिता महिषासुरांतकरिणीसर्वसिद्धिप्रदायिनी ३८
दशाक्षरस्यमंत्रस्यमूर्तिःसापरमेश्वरी पूजितातेनभक्तानांअभीष्टफलदायिनी ३९ सुरामांसोपहारैश्चभक्ष
भोज्यैश्चपूजिता नृणामशेषकामान्साप्रसन्नासंप्रयच्छति ४० द्वाराण्येतानिचत्वारितथादारस्थदेवताः प्रे

क्षितव्याश्चपूज्याश्चयथोक्तफलमिच्छता ४१ साक्षरस्यसचिन्होसोतत्रास्तेभगवान्हरिः तान्यक्षराणिदेवेशीदि
व्यमंत्रउदाहृतः ४२ चिन्हान्यसुरवर्यैश्चकृतान्यजिषुसंगतेः कालत्रयविगुणास्यागायत्रीचसुरेश्वरी ४३ वि
मूर्त्तिःपूजनीयोसोविधिमंत्रैःसुरारिहा विमूर्त्तिर्लिंगचिन्हानियथाकामयतामया ४४ जानाम्याराधनात
स्यतंमंत्रंमोपदिष्टवान् त्रिदंष्ट्राख्योसुरादेवीविष्णुनानिर्जितःपुरा ४५ तेनाचयुध्यतःकोपात्गदामुद्य
म्यसंभ्रमात् ताडितंपांडुरंगस्यवामभागेसुरेश्वरी ४६ क्षुब्धकोपेहिःचिक्यंचभग्नमद्यापिदृश्यते क्षे
त्रात्मात्रेतीर्थात्मामूर्त्यात्मेतित्रिधास्थितः ४७ क्षेत्रेतीर्थेचमूर्त्तौचपूज्योसावक्षयोविभुः क्षेत्रेयथाचपूज्यो
यंतन्निबोधचित्क्षणे ४८ क्षेत्रस्थेमूसुरैर्देवीपूजितःपूजितोहरिः तस्मात्क्षेत्रप्रशस्तंस्याद्दानादिसुरपू
जिते ४९ सुवर्णरजतादीनिवस्त्रकंबलकानिच अनंतफलदानिस्युःक्षेत्रदत्तानिभामिनी ५० धान्यंप्रस
त्तिमप्यत्रयोददातिद्विजातये अग्निष्टोमफलंप्राप्यमोदतेदिविमानवः ५१ कुटुंबपोषणंचात्रयःकरोति
सदानरः देवदेवेनतस्यातंफलंयत्तश्रृणुष्वमे ५२ श्रोत्रियंचदरिद्रंचविद्वांसंचकुटुंबिनं यःपुष्णातिनरो
नित्यंसोश्वमेधीदिनेदिने ५३ तस्मात्सर्वप्रयत्नेनक्षेत्रस्थानंचयेद्बुधः तैरर्चितःक्षेत्रमूर्तिरर्चितःस्यान्न
संशयः॥५४॥इतिश्रीस्कंदपुराणेउत्तरसंहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेद्वितीयोध्यायः॥२॥

ईश्वरउवाच तीर्थमूर्त्तार्चनंवक्ष्येशृणुविष्णोर्यथार्थतः सिंचनक्रीउनादीनिपायसादीन्त्रेवहि १ भोजना
निप्रशस्तानितोवृत्तादीनित्रेवहि तीर्थमूर्त्तार्चनेनेशः प्रसन्नःस्यान्नसंशयः २ सर्वान्कामानवदात्येवभक्ता
नांमत्कृत्सज्ञः मूर्त्तार्चनमपिप्राज्ञेपथावश्रोतुमर्हसि ३ वसंतेदेवदेवंचविमूलैःकुसुमैःशुभैः संपूज्यचंद
नर्गंधैः स्वेतवस्त्रेश्चमामिनि ४ उच्चावचैःफलैर्लेह्यैरूपेःशर्करान्वितैः मंडकैर्घृतपूरैश्चदध्यन्नैश्चसुशो
भनैः ५ नानाविधैःफलैश्चापिनैवेद्यैर्भक्षिकादिभिः दत्वासहृदपिप्राज्ञपूज्येवविधिवन्नरः ६ इष्टान्कामा
निहप्राप्यसायुज्यंलभतेनरः ग्रीष्महाभिषवेश्चकुसुमैर्मल्लिकादिभिः ७ क्षीरस्नानैःप्रशस्तैश्चकर्पूरो
शिरचंदनैः अनुलेपैः क्षोमकाद्यैर्वस्त्रैश्चान्यैः सुशोभनैः ८ पूर्वोक्तैरुपहारैश्चपूजयित्वायथाविधि तद
वफलमाप्नोतिवर्षास्वपिशृणुष्वमे ९ स्नपनंदकैः प्रशस्तैश्चशातपत्रैश्चशोभनैः कुसुमैरनुलेपैश्चरक्तवस्त्रै
श्चशमामिनि १० घृतार्कैस्तैलपक्वैश्चपिष्टैःप्रेयंगकैरपि गुग्गुलैश्चतथापिष्टैःशार्कैश्चाक्षेरपि ११ प्रशस्त
श्चारुभिश्चैवपायसैश्चसुशोभनैः अन्यैश्चतैलपक्वैश्चबहुगव्यघृतैरपि १२ एवंसंपूज्यविधिवत्अग्निष्टोम
तेफलं शरद्ऋतोतुदेवस्यतत्कालकुसुमैःशुभैः १३ दधिस्नानेप्रशस्तैश्चअनुलेपैःसुशोभनैः तैलपक्वैःप्रश
स्तैश्चलड्डुकैरपिशोभने १४ भक्ष्यैरन्यैस्तैलपक्वैर्बहुगव्यघृतैरपि संपूज्याचप्रणम्यैवंसर्वान्कामानवाप्नुयात् १५

हेमंतेपिघृतस्नानैःपुष्पैस्तत्कालजैःशुभैः रक्तमांजिष्ठकैर्वस्त्रैः कौसुंभैरनुलेपनैः १६ सर्वोक्तैरुपहारैश्चपूजयि
त्वाचमक्तितः सर्वान्कामानिहप्राप्यसायुज्यंलभतेनरः १७ शिशिरेदेवदेवस्यस्नानैरभ्यंगकैरपि पंचामृतैरिक्षु
रसैः स्नाप्यकस्तूरिकारसैः १८ रक्तवस्त्रैःसमांजिष्ठैर्वस्त्रैःकार्पासकैरपि उपहारैःप्रियंगास्तैर्नानारससमन्वि
तैः १९ संपूज्यप्राप्नुयात्कामानंतसायुज्यमेवच तीर्थमूर्त्तीस्त्रिमूर्त्तीमूर्त्तीमपिवरानने २० अर्चभागानवस्थ्य
माणान्शृणुविष्णोर्यथार्थतः देवस्यपरितःपंचविंशद्धस्तप्रमाणतः २१ स्त्रिमूर्त्तेःप्रशस्तंस्यादर्चभागंपरं
हितत् उच्छिष्टादीनितत्रैवनकार्याणिकदाचन २२ कुर्वन्नरकमाप्नोतियावदिंद्राश्चतुर्दश सर्वोत्कृष्टतुतत्स्त्रै
तीर्थमूर्त्तीसुरेश्वरि २३ अर्चभागंपरंविद्यात्सर्वकामफलप्रदं उच्छिष्टादीनितत्रैवशोचादीनित्यवर्जयेत् २४
कुर्वन्महदवाप्नोतिकिल्बिषंनात्रसंशयः मूर्त्तामप्यर्चभागंहीममस्थानंप्रशस्यते २५ तत्रानर्च्ययोर्चयतितस्य
पूजातुनिष्फला देवस्यपश्चिमेभागेपद्मतीर्थंसुशोभनं २६ धनुःशतप्रमाणेनसर्वपापप्रणाशनं निर्मितंयत्
तत्रपूज्यंतिष्ठत्यपरिवंदते २७ शंखाख्यश्चैवपद्माख्यस्तत्रास्वर्याण्यनेकशः अश्वत्थरूपिणोदेवोतत्रास्तांसुर
पूजितो २८ नरनारायणोदेवोप्रणताभीष्टदायको तत्रस्नानंतर्पणंचपावनंपरमंस्मृतं २९ निस्तःकोद्योमहा
भागादेव्यस्तत्रसमासते नीराजनंप्रकुर्वंतिवैष्णव्योविष्णुचक्षुषाः ३० ईशान्येदेवदेवस्यशतहस्तप्रमाणतः॥

कुंडलाख्यंमहातीर्थंतिष्ठत्यनुपमंभुवि ३१ भूमावंतःस्थितातत्रतस्यांस्निग्धेचकुंडले देवदेवेनतन्नाम्नाख्यातिमा
पजगत्त्रये ३२ अश्वत्थरूपीनृहरिस्तत्रास्तेसुरवंदितः स्वमंत्राराधितोनृणांसर्वसिद्धिप्रदायकः ३३ तत्रस्नात्वा
सकृन्मर्त्यस्तर्पयित्वापितॄंस्तथा नत्वातुनृहरिंभक्त्यावाजिमेधफलंलभेत् ३४ कोद्यस्निग्धोमहादेव्यानीराजन
द्यतोद्यमाः तिष्ठंत्यनुमताः शूंसः सर्वक्लेशभयापहाः ३५ भुवनाधिपतिर्देवीयत्रतिष्ठतिभामिनी विंशद्धनुः
प्रमाणेनतस्याः प्राकृतीर्थमुत्तमं ३६ पुष्पावतीनदीभेम्यासंगतालोकविश्रुता तत्रस्नानंचदानंचराजसूयफ
लप्रदं ३७ देवस्यदक्षिणेपार्श्वेत्रिंशत्कोद्यः सुपूजिताः तावत्योवामभागेचपश्चिमेतावतीस्तथा ३८ पुरोभा
गेपितावत्यस्तिष्ठंतिसुरसंगनाः विष्णुप्रियामहाभागारूपवत्यः सुशोभनाः ४० नीराजनोद्यताः सर्वाः सर्व
लोकेषुपूजिताः एकान्यागोपिकापूर्वंतपस्तेपेसुदुष्करं ४१ तस्याः प्रीतोभवद्देवोवरदोस्मीत्यभाषत सादस्रा
मोहकंरूपंगोपालस्यमहात्मनः ४२ पादयोरवसंलग्नाचिंतेनान्यदजानती मदनेनार्दितासुभ्रूर्विस्रस्तक
बरांशुका ४३ तांदृष्ट्वाप्रसहद्देवोकिमेतदितिचाब्रवीत् साचतंतापप्रसन्नंतं हसितागोपमूर्तिना ४४ श्रीपा
दयोरुपवितंकराभ्यामग्रहीत्स्पृशं अथवव्रेवरान्देवीत्वत्समीपेवसाम्यहं ४५ पादौतेसुंदरौदेवममचित्तहरा
वुभौ लावण्यमेतयोर्हिभूषणायममप्रभो ४६ मत्करापीडितावेतावास्तांलांछनलांछितौ तथेवमुक्तास

गवानिमूर्त्तेप्रहसन्निव ४७ एवमेवास्तुतेसर्वंमुक्तकेशीतिसंस्तुता नग्नाविस्रस्तकबरासर्वाभरणभूषिता
४८ अथलब्ध्वावरान्देवी अस्तेसर्वांगशोभिनी ईशान्येतस्यदेवस्यवसंतिरुचिरानना ४९ अद्यापिदृश्यते
पुम्भिः पुण्यैरुद्भिर्वरानना नत्वार्थंदर्शनंतस्याभवत्यमरविंदते॥५०॥इतिश्रीस्कंदपुराणउत्तरसंहितायांपां
डुरंगमाहात्म्येउमामहेश्वरसंवादेतृतीयोध्यायः॥३॥ ॥श्रीशंकरउवाच॥ पश्चाद्भीमीसमायाताममांगान्नि
सृतापुरा नानादेशान्प्लावयंतितत्क्षेत्रंभुविविश्रुतं १ तरंगैर्घोषयंतीसादृष्ट्वाक्षेत्रंव्यतिष्ठत तांभीतां
त्रेक्ष्यदेवेशारंवचनमब्रवीत् २ एहिदेवीनभेतव्यंत्वयासर्वात्मनाशुभे ममादेशादिदंक्षेत्रंसंप्लावयितुम्
र्हसि ३ वचनात्तस्यदेवस्यक्षेत्रसंप्लावयत्सणात् तत्पाभून्नारसिंहाख्यंक्षेत्रंपरमपूजितं ४ यत्रास्तेभग
वान्साक्षात्हिरण्यकशिपोरिपुः दात्रिंशद्भुजसंयुक्तोनारसिंहः सुरारिहा ५ त्रिंशद्धनुःप्रमाणंतत्तीर्थंब्र
ह्मादिवंदितं तत्रस्नानंप्रकुर्वाणोवाजिमेधफलंलभेत् ६ आगस्त्यमितिविख्यातंतीर्थंऋषिभिराश्रितं॥
सप्तसप्तनिहस्तंस्यात्स्नानात्सायुज्यदायकं ७ आगस्त्यस्यतपस्तत्रासत्रसिद्धिमवापह जलमध्येलिंग
मूर्तिरगस्त्येनसुपूजितः ८ अहंतिष्ठामिदेवेशि सर्वकामफलप्रदः गाणापत्यंततः पूर्वंसर्वविघ्नविनाशनं
९ यत्राराधजगन्नाथंगोपालंगोपबल्लभं तन्मंत्रस्यागतांप्राप्यस्थितस्तत्रविनायकः १० तत्रस्नात्वासकृन्म

र्त्योविघ्नान्बहुविधानपि विधूयपापेनिर्मुक्तोगणेशलोकंचगच्छति ११ ततःसर्वमहातीर्थसंकर्षणमुदाहृतं तीर्थयात्रांप
कुर्वाणोहरीस्नात्वातुतत्रैवै १२ प्रत्यक्षरूपिणंदेवंपांडुरंगमपश्यत वरदोस्मीतितेनोक्तोवरमेतमयाचत १३ म
न्नाम्नैवभवतीर्थेस्नानात्सायुज्यदायकं एवमस्त्वितितस्योक्तातत्रैवांतर्दधेहरिः १४ तत्रस्नात्वापीतांबरसायुज्यं
लभतेनरः तस्मात्पूर्वंजाबालितीर्थेपापप्रणाशनं १५ जाबालिस्तुतपस्तप्त्वासिद्धियवापसुव्रते तत्रस्ना
नादतीवफलमाप्नोतिमानवः १६ पंचाराद्दनुरायांपापेष्वपिसुखप्रदं ततोनंतरतःप्रोक्तंबलतीर्थसुत्तो
मं १७ आराधयंदेवदेवंयत्रास्तेकमलोद्भवः चातहस्तप्रमाणंतुसर्वसिद्धिप्रदायकं १८ नवाचापरिमंपस्या
न्माहात्म्यंतस्यमामिनि सकृत्तत्स्नानतोवापिवाजिमेधफलंलभेत् १९ पंचधासमभूद्यत्रभीमीभवभयापहा त
तीर्थपंचगंगाख्यंस्नानात्सायुज्यदायकं २० ततोदक्षिणतःप्रोक्तंकलशंतीर्थमुत्तमं दशहस्तप्रमाणंतुतद्वि
प्राणांप्रददंनृणां २१ पांडुमृतादभवद्वीरास्तत्रसुस्थिरी ब्रह्मतीर्थंकलशंचमोक्षदंतुभयंस्मृतं २२ ततोद
क्षिणतःप्रोक्तंपितृतीर्थमुडुत्तमं समहस्तप्रमाणंस्यात्पितृणांवल्लभंमतं २३ तत्रपिंडप्रदानंहिगयाश्राद्धा
ताधिकं तत्रस्नात्वासकृन्मर्त्यस्तर्पयित्वापितॄन्नथ २४ एकविंशतिपितॄणांकुलानुद्धरतेध्रुवं ततोदक्षिण
तःपुण्यंचक्रतीर्थमुदाहृतं २५ चक्रांकितांबिलायत्रदृश्यतेद्यापिसुंदरी नवहस्तप्रमाणंतुपापिनामपिदुर्ल

भं २६ तत्रस्नात्वासकृन्मर्त्योमोदनेनपुरुषोत्तमं पश्यन्सायुज्यमाप्नोतिनात्रकार्याविचारणा २७ ततोदक्षिण
तोलक्ष्मीतीर्थंपुण्यंप्रचक्षते यत्राराधजगन्नाथंगोपालंगोपवल्लभं २८ जगन्नाथस्यदेवस्यवक्षोनिलयमा
पसा शंखतीर्थंचक्रतीर्थंपद्मतीर्थंसुशोभनं २९ गोपीकौमोदकीतीर्थंततोदक्षिणतःशुभे तीर्थानांपंचकंह्य
तन्मुक्तिदंस्नानमात्रतः ३० षष्टिहस्तप्रमाणंस्यात्परमंपावनंस्मृतं तत्रस्नात्वासकृन्मर्त्यः सायुज्यंलभतेध्रु
वं ३१ सर्वोत्तमंततःपूर्वंत्रैलोक्येपिप्रपूजितं पांडुरीकंसुरक्षानिदर्शनान्मुक्तिदंनृणां ३२ स्नानंजपस्तपोदा
नंसर्वंतत्रप्रशस्यते शातहस्तप्रमाणंतुविष्णोस्तनुरुदाहृतं ३३ ततोदक्षिणतःप्रोक्तंतीर्थंमौक्तिकसंज्ञितं शु
क्तिगोपिकायत्रतपस्तेपेसुदुष्करं ३४ प्रत्यक्षंदेवदेवेशंवरंवव्रेवरप्रदं तत्तीर्थस्याधिपत्यंचमोक्षदायित्वमेवच ३५
तथेत्युक्त्वादेवेनतत्रास्तेपुलिनेशुभे नग्नाविस्रस्तकबरासर्वाभरणभूषिता ३६ तत्रस्नात्वापीतांबरब्रह्मभू
यंप्रकल्पते संगमास्यंमहादृश्यंनिपात्यचसुरारिहा ३७ तस्योपरिस्वकौपादौकृत्वाविष्णुरतिष्ठति अद्यापितत्रसंस्प
र्शेदृश्यतेश्रीपदंविभोः ३८ महात्मानंतत्रकुर्यात्पिंडोजनान्यपिसुव्रते अनंतफलमाप्नोतिमार्गशीर्षेविशेषतः ३९ त
स्यनाम्नैवविख्यातंतीर्थंस्नानादिमोक्षणं पुष्यावतीनदीपश्चात्संगतासीमकन्यया ४० संगमः सुमहापुण्योनानाश्च
र्ययुतप्रिये तत्रस्नात्वापीतांबरपार्षदत्वंप्रपद्यते ४१ सोमतीर्थंमहत्पुण्यंपापिनामपिमोक्षदं तत्रस्नात्वासकृन्मर्त्यः सो

मलोकंव्रजेध्रुवं ४२ देवनदीर्थंततः पूर्वंदेवायत्रास्थिताःप्रिये तत्रस्नात्वामोतिदेवानांसमंपदं ४३ सूर्यतीर्थं
ततःप्रोक्तंसौरानुष्ठानसिद्धिदं तत्रस्नात्वासकृन्मर्त्यःसूर्यलोकंव्रजेध्रुवं ४४ ततः पूर्वेसरस्वत्यास्तीर्थंपुण्यंप्रशस्यते
तत्रस्नात्वापीत्वाचतर्पयित्वापितॄनथ ४५ सर्वान्कामानिहप्राप्यब्रह्मलोकंसगच्छति पूर्वद्वारस्थदेव्यास्तुसरस्वत्याः
सुपूजनं ४६ महोत्साहोमहानंदःस्थानेचात्रप्रशस्यते तत्रास्तेभगवान्साक्षाद्विष्णुरूपधृहरिः ४७ अनुष्ठानव
तांनृणांसर्वसिद्धिप्रदायकः एतत्तेकथितंदेवीयत्पृष्टोहमिहत्वया ४८ क्षेत्रंतीर्थंदेवतंचसर्वोत्कृष्टमभीष्टदं माहात्म्य
मेतत्पठतांशृण्वतांवापिमक्तितः ४९ भवत्प्रीत्याःसफलाकामाविष्णोःप्रसादतः॥५०॥इतिश्रीस्कंदपुराणेउत्तर
संहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेचतुर्थोध्यायः॥४॥ ॥सूतउवाच॥गतेषुमुनिवर्येषुकुमारेचगते
तथा भागवत्प्रवरोत्यागात्कैलासंनारदोमुनिः १ समागत्यद्रुनदींसः स्नात्वापीत्वाजलंशुचि विविक्तउपवि
श्यैको ददर्शोमुनिसत्तमान् २ कुमारंचमहात्मानंचिंतयामासपद्मजः किमागमनएतेषांकारणंदिव्यचक्षुषां ३
मुनीनांदेवपूज्यानांकुमारस्यचधीमतः प्रायेणधर्मसंदेहोजातोस्तिमुनिभिःसह ४ आगतःपितरंप्रष्टुंकार्ति
केयोमहामतिः पुराणसंहितामेध्यःप्रोवाचासावितिस्मृतं ५ तत्रसंचायनुत्सर्यमागतोत्रनसंशयः किंपरंपरमंगु
ह्यंएभिःपुत्रेणचप्रभुः ६ संसारमोचकःशुद्धोसर्वज्ञोजगदीश्वरः कर्त्रावक्तृचधर्माणांहरःसर्वहरोमहान् ७ श्री

तारःसकुमारस्तेमुनयःकिंनुदुर्लभं सत्वंरजस्तमइतिगुणाःपद्धतिसंभवाः ८ तामसादानवाःप्रोक्ताःराजसा
मनुजाःस्मृताः सात्विकाश्चतथादेवाःश्रेष्ठापूज्यतमाश्चते ९ तेभ्यःश्रेष्ठस्तथारुद्रोनास्तिदेवेषुतत्समः भक्तिज्ञा
नविरागादिष्वस्यनास्तिसमोपरः १० सुपितोहमभाग्योहंसंगाद्भवभयापहात् महत्संगविदूरस्थनसुखंनपरा
गतिः ११ अथापिमयिकारुण्यात्शंकराल्लोकशंकरः वदिष्यतिनसंदेहोसुगोप्यमपिमेविभुः १२ साधूनांविष्णु
तंचाणांसर्वत्रसमचेतसां अनसूयेषुशिष्येषुनास्तिगोप्यमहात्मनां १३ अहंचानुचरस्तस्यमयिप्रीतिर्विशेषतः
अतस्तंयामिशरणंपृच्छामिसवदिष्यति १४ इतिनिश्चित्यमनसानारदोलोकपूजितः कैलासमारुहत्तुंगंरजता
द्रिप्रियंविभोः १५ ददर्शशर्वंदेवेशंसर्वतंपावनंवृहत् वृतंयोगिभिरात्मस्थैःस्वात्मजैसनकादिभि १६ चंडीश
मणिमुख्यैश्चसेवितंप्रियया युतं स्वांकस्थयास्वपरयाश्रुतकौतुकतुष्टया १७ वरदाक्षमालांबिभ्राणंतुष्टिचित्तंत्रि
लोचनं ववंदेदंडवत्तस्यपादोपांतेमहात्मनः १८ प्रियादर्शनसाह्लादंप्रकटत्कलकुमुन्मिषं अलोपीनारदः शं
भुं ज्ञानविज्ञानभाजनं १९ नमोविज्ञानवीर्यायनमोविज्ञानमूर्त्तये नमोलोकहितार्थायलोकानांगुरवेनमः २०
सृष्टिस्थितिक्षयकरोभवान्लोकस्यसुव्रत त्वयैवरक्षितालोकाविध्वंसंसर्वमयंकगात् २१ त्रिपुरांतकत्रिनयनत्रैलो
क्यप्रतिपालक त्वमेवनाथोलोकानांरक्षकःशरणैषिणां २२ रजसासृजसेलोकानुपासिसत्वेनसंस्थितो त्रम

सानाशाकः सर्वदेवानांप्रवरप्रभो २३ अहंत्वत्किंकरोनित्यंसुप्रीतोस्मिमहामते ऋषीणांसकुमाराणांउत्कंतत्वंप्रसं
गतः २४ सत्संगाद्विच्युतस्येहहानिःक्लेशोभयंमुहुः भवतीतिवचःसत्यंमयिज्ञातंसुरेश्वर २५ तत्समीपान्मयिगते
मुनयःकिमपृच्छत किंतेषामुत्तरंदत्तंभवताविदुषांप्रभो २६ नतुसत्संगतोलोकेपावनंनविदामहे वक्तासर्वेषुलो
केषुत्वत्समोनास्तिचापरः २७ अतस्तत्सर्वमाख्याहिगदितुंयदिमन्यसे कृपाशिष्येषुमहतीत्वद्विधानांमहात्म
नां २८ सूतउवाच एवंपृष्टोनारदेनशंकरोलोकशंकरः संस्मृत्यपुरुषंपूर्णंजगादागाधबोधयुक् २९ शंकरउ
वाच शृणुनारदतत्तेनपवित्रंपापनाशनं गुह्याद्गुह्यतरंब्रह्मनूयतेसृष्टंऋषिभिःपुरा ३० मत्तोन्योनैवजानातिदेव
र्षिर्मनुजादिषु प्रसादात्तस्यदेवस्यममाज्ञानंनविद्यते ३१ पुराहंमंदरद्रोण्यांपार्वत्याप्रिययासह रममाणोगुणै
स्तस्यास्तुष्टस्तांमिदमब्रुवं ३२ प्रियेपार्वतितुष्टोहंवरंवरयसुव्रते मयिप्रसन्नेवरदेकिमलभ्यंतवानघे ३३ एव
मुक्तामयादेवीप्रोवाचस्नेहयंत्रिता यदितुष्टोसिमेदेवत्वयिनिष्ठतुमेवरः ३४ ततःकालेनमहताव्रतंवरमंग
ना मयिप्रसन्नेवरदेत्वपृष्टत्यार्वतीपुनः ३५ देवदेवजगन्नाथलोकनाथनमस्कृत प्रश्नमेकंममविभोप्रसादाद्व
क्तुमर्हसि ३६ काशीगयाकुरुक्षेत्रंनैमिषंपुष्करंतथा केदारंकनकारण्यंदंडकारण्यमेवच ३७ सेंधवंचगुहा
रण्यंचंपकारण्यमुत्तमं गंगायमुनयोस्त्रैवसरस्वत्याश्चसंगमः ३८ एवमादीनिभूलोकेसंतिस्थानानिभूरिशः

केषुचिन्मरणंश्रेस्तंवासःकेषुचिदुत्तमः ३९ एतेभ्योपुत्तमंक्षेत्रंदर्शनान्मुक्तिदंनृणां तत्वतस्तत्प्रियंदेवदे
वतेब्रवीहिमे ४० पद्मोद्भवोभवान्शक्रःसूर्यश्चंद्रोबृहस्पतिः दक्षाद्यायेप्रजेशाश्चमन्वाद्याश्चक्रवर्तिनः ४१
ऋषयःपितरःसिद्धाविद्याधरमहोरगाः मानुषापशुकीटाद्यापक्षिणोयेसरीसृपाः ४२ यत्किंचित्स्थावरंना
थभौतिकंजंगमंतथा येनसृष्टंस्थितंयेनयेनांतेचविनश्यति ४३ ब्रह्मासृजतियेनेदंयेनेदंग्रसतेभवान् चा
द्याः पालकायेनमहानद्योमहेश्वराः ४४ महाविष्णुर्महाशक्तिर्महानंदोमहाप्रभुः यत्रतिष्ठंतिदेवाद्यादे
वंतद्ब्रूहीहिमे ४५ गंगादीनिचतीर्थानियानिसंतीहभूतले तेभ्योप्युत्तमंतीर्थंविद्यतेतद्ब्रवीहिमे ४६
एतत्त्रितयमेकत्रमिलितंयत्रदृश्यते तत्क्षेत्रंत्वामृतेदेवनजानात्यपरःपुमान्॥४७॥ इतिश्रीस्कंदपुरा
णउत्तरसंहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेपंचमोध्यायः॥५॥ ॥श्रीशंकरउवाच॥एवंपृष्टस्तयाब्रह्मन्ब्रवीम्युत्तरमित्यहं अचिंतयंतदातत्रकुमारःसमदृश्यत १ आरुह्यशिखिनंब्रह्मचरस्यादिभिरन्वितः
पुराप्रेरितंस - - पुराणकथनायहि २ ऋषीणांश्रोतुकामानांजगादस्कंदसंसदि क्षेत्राणांचैवतीर्थानांश्च
त्वामाहात्म्यमंजसा ३ एवस्तेरिममेवार्थंनोवाचोत्तरमब्धीः तदर्थमिहसंप्राप्तोमुनिभिःश्रवणोत्सुकै ४ पृ
ष्टस्तैरिममेवार्थंसर्वज्ञोहंमहर्षिभिः तदातत्कीर्तितंसर्वंमयानारदविस्तरात् ५ तच्छ्रुत्वामुनयोहृष्टाःकुमारश्च

महामतिः स्तोगतास्तेदेवर्षेततस्त्वंसमुपागतः ६ नारदउवाच देवदेवेशसर्वज्ञसर्वानंदविवर्धन यत्त्वत्रि
तयंशंभोतत्वंप्रब्रूहिमेप्रभो ७ श्रांतंमयाजगत्सर्वंनदृष्ट्वेनश्चर्तंपुरा एतत्त्रितयमेकत्रमहदाश्चर्यमेवमे ८ श्रीश
करउवाच ब्रह्मन्ब्रह्मण्यदेवस्यकथायांयेरतानृषि पियायाःपुत्रतस्तेतुममप्रियतमामताः ९ अतस्तेकथ
यामद्ययथाकथितमेतयोः गुह्यंविष्णुरुद्रयोर्धेनस्तातंयत्सुरैरपि १० जानाम्येतत्तथाब्रह्मश्रीःशक्तोगरुडो
मनुः ब्रह्माणीचतथाशेषोनान्योजानातिकश्चन ११ क्षेत्राणांपरमंक्षेत्रंगुह्यानांगुह्यमुत्तमं क्षेत्रराजमिमं
ज्ञात्वासर्वपापैःप्रमुच्यते १२ नास्तिनारदक्षेत्रस्यभूसंबंधःकदाचन तितस्तिमात्रतस्यस्कोतिष्ठत्यंबरण
वतत् १३ ज्योतिर्मयानिपानानियथानभसिशांतिवै एवंज्योतिर्मयंक्षेत्रमंतरिक्षेऽवभासते १४ किंवहूक्तेन
देवर्षेपातालेनांबरेभुवि नास्तिनास्तिसमंक्षेत्रमतस्त्वत्रवसाम्यहं १५ अहंब्रह्मानविष्णुश्चत्रयएतेसुरेश्व
राः सह्यपादप्रसूतानांनदीनामभिमानिनः १६ विष्णुःकृष्णांतथाब्रह्मागोतमींपापनाशनिं भेमीमहं
पुण्यजलामधितिष्ठामिसर्वदा १७ दंडकारण्यमारभ्ययावत्संपासरोवरं ब्रह्मणश्चतथाविष्णोर्धर्मक्षेत्रा
णिनारद १८ विष्णुक्षेत्रगताभैमीतदासाविष्णवीस्मृता ब्रह्मणःक्षेत्रगाब्राह्मीरौद्रीमत्क्षेत्रगामता १९
पुण्यतोयापापहरापुण्यद्विजकुलाकुल पवित्रामगवत्क्षेत्रंभैमीभीमसमुद्भवा २० यत्रचास्तेहरिःसाक्षात्

नृसिंहोसुरदर्पहा नीरानामनदीयत्रसंगताल्लोकमंगला २१ तत्प्रारभ्यसाभैमीवैष्णवीनारदोच्यते याव
त्कृष्णागतापुण्यातत्तोममपुराविधेः २२ एवंत्रैयात्मिकाभैमीनदीनामुत्तमोत्तमा श्रीनृसिंहोमहासिंहोयत्र
तिष्ठतिसंगमे २३ तत्क्षेत्रेतुमहापुण्यंविष्णोः प्रियतमंमुने तत्संगममसक्तत्वात्तादक्षादेवंन्नकेसरी २४ दत्ता
किंचिद्यथाशक्त्याविष्णोरत्रपुरंव्रजेत् कुरुक्षेत्रादिगमनंतेषामेवफलप्रदं २५ येनजानंतिनृहरेः क्षेत्रंपुण्यंसु
शोभनं पक्षादोदैत्यराडत्रसारूप्यपदवींगतः २६ तंदृष्ट्वामुच्यतेजंतुः सर्वपापैर्नसंशयः क्षेत्राणामुत्तमं
क्षेत्रंनारसिंहंमहाफलं २७ तत्रस्थायेनराःसर्वेदेवास्तेनैवमानुषाः अहोक्षेत्रस्यमाहात्म्यंसमंताक्रोशपंचकं २८
दृष्ट्विस्थायत्रपश्यंतिसर्वतोवच्चतुर्भुजान् यःप्राणान्विसृजेन्मर्त्यस्तस्यदेवस्यदक्षिणे २९ कुलकोटिंसमुद्धृत्य
सगच्छेत्परमंपदं ब्रह्मभवासुरापावास्तेयीवागुरुतल्पगः ३० तत्संगीवात्यजेत्प्राणान्नरागच्छेत्परंपदं वाममू
तः सार्वभौमपृष्ठेस्वगीनसंशयः ३१ पुरतोदक्षिणेवापिमुक्तोभवतिनिश्चयः तस्मान्नारदतत्क्षेत्रंबुद्धिमानात्र
येत्पुमान् ३२ अत्रतेसुमहापुण्यमितिहासंब्रवीम्यहं कलिंगादागतस्तत्रब्राह्मणोब्रह्मचित्तमः ३३ वंगदेशे
गृहीतस्तुतत्रत्यैर्जनैर्नरैः स्त्रंसितोमधुमांसादिवृषलीसंगतोद्विजः ३४ सुरामांसादिभिर्भोज्यैस्तांपुपोष
दिनेदिने ततःकालेनसानष्टासोपिचांडालतांगतः ३५ चांडालंबुभुजेमंतःनस्योमजानपत्सुतान् त्यक्त्व

स्तदारांस्तानूनष्टस्सर्वद्विजस्मृतिः ३६ एकदासगतोऽरण्यंमांसार्थंश्वानयुग्मयुक् रुरुस्तोमहारण्येनिह
त्यशशालावकान् ३७ क्षिप्तांतेमत्पुरोभ्रांतोसामिषोयहमागमत् तावदग्निर्यहंतस्यसपुत्रंसपरिग्रहं ३८ दद
हक्षणमात्रेणसदारंकालचोदितः तद्दृष्ट्वावन्हिनायस्तंशोकेनाकुलितेक्षणः ३९ रुरोदबाष्पपूरेणप्लावितो
दुःखितोपतत् संप्राप्यसंज्ञांकृच्छ्रेणनियम्यात्मानमात्मना ४० तावन्मोक्ष्येनपिवेयावद्यामिस्वकान्शिश्
न् इत्युत्थानिर्गतोब्रह्मन्निर्जनंकाननंरुरुः ४१ कालेनगतवांस्तत्रयत्रास्तेनृहरिःपरः तीर्थेनस्मिन्संग
मास्थ्यस्नात्वादृक्षवान्केसरिं ४२ उपवासश्रमोदीनःपपातत्वमुमारच यमेनप्रेषिताद्दूतास्तंबबंधुःरुषान्विताः
४३ चक्रोशविदनायस्तस्मात्तिस्तर्जितश्चतैः श्रुतंतन्महदाश्चर्यंहरिणाद्भुतकर्मणा ४४ रसार्थंस्थापितंतेनसु
दर्शनमुपाद्रवत् प्रलयानलसंकाशंचिक्षेदास्यचबंधनं ४५ तदाहतेःसमीपस्थाश्चारुचक्रासिपाणयः य
युस्तत्तेजसादूरंगतास्तेयमकिंकराः ४६ विमानेदिव्यमारोप्यनिन्युस्तेहरिमंदिरं चतुर्भुजोरविंदाक्षः पद्म
मालीमहाद्युतिः ४७ अद्यापिश्रूयतेब्रह्मन्कुमुदोनामपार्षदः एवंप्रभावयुक्तेसत्रंनारदेतन्मयोदितं ४८
एवंप्रभावःहरिरास्तेतत्क्षेत्रमगः — — देवाब्रह्मादयःसर्वेतथाकिन्नरगुह्यकाः ४९ मुनयःसिद्धगंधर्वास्तम
द्यापिह्युपासते अद्यापिश्रूयतेरात्रौघंटानादः सुरैःकृतः ५० अहंचसर्वदातत्रवत्स्येक्षेत्रस्यदक्षिणे मातृ

हापितृहाचैवभ्रातृहागुरुहातथा ५१ तत्क्षेत्रवासान्नशंहा देवैःसर्वैःपपूज्यते तस्मात्सर्वप्रयत्नेनतत्क्षेत्रस्थो
भवेन्नरः ५२ नारदउवाच स्वामिन्ननुग्रहीतोस्मित्वयाहमखिलेश्वरः श्रुतंनरहरेःक्षेत्रंसर्वपापप्रणाशनं ५३
यत्त्वयाऽभिहितंदेवमुनीनांचसुतस्यच तीर्थंक्षेत्रंदेवतंचतन्मेब्रूहिसुरेश्वर ५४ श्रीशंकरउवाच धर्मवीरानदी
यत्रसंगताभीमकन्यया तस्मादोजनतःपूर्वंक्षेत्रराजोविराजते ५५ यस्यदर्शनमात्रेणमहापातकसंक्षयः क्षे
त्राणांपरमंक्षेत्रंपौण्डरीकमितिस्मृतं ५६ गंगायायमुनायाश्चममविष्णोर्यथांतरं क्षेत्राणांचैवसर्वेषांतस्यापि
चतदंतरं ५७ नक्षत्राणांचंद्रमसोर्यदंतरमुदाहृतं अन्येषाक्षेत्रजातीनामस्यापिचतदंतरं ५८ मयापिनारदक्षे
त्रमहिमात्तायतेनहि वर्णयामियथाशक्त्यातमिहैकमनाःश्रृणु ५९ गंगायमुनयोर्मध्यंकथितानिमुनीश्वरैः
क्षेत्राण्यस्यचदेवर्षेकलांनार्हंतिषोडशीं ६० पापारण्यस्यदावाग्निरात्रितानांसुरद्रुमः विष्णोःप्रियतमंभूमौ
क्षेत्रमेतत्प्रकीर्तितं ६१ ऋषयःपितरःसिद्धाविद्याधरमहोरगाः तत्क्षेत्रंहिसमाश्रित्यमोदंतेसुखिसर्वदा ६२ अ
हंब्रह्मादेवाश्चमुनयःसनकादयः सर्वदातत्रवत्स्यामस्तदुपासनलालसाः ६३ अन्यक्षेत्रेकृतंपापंपुण्यक्षेत्रे
विनश्यति पुण्यक्षेत्रेकृतंपापंपांडुरंगेविनश्यति ६४ पांडुरंगेनपापस्यजन्मनारददृश्यते वंध्यायांपुत्रजन्मस्या
दृष्टमत्तैलंचसेकते ६५ मृतस्यपुनरावृत्तिर्नपापस्येहनारद कुरुक्षेत्रादिकेचापियत्पापंनविनश्यति ६६ तस्या

प्यविनाशः स्यादतः क्षेत्रमिदंमहत् कार्त्स्न्यांमृतस्ययासिद्धिः पतितस्यप्रयागके ६७ कुरुक्षेत्रेस्वर्णदातः क्षणा
र्द्धेनात्रसाभवेत् नारीवाथनरोवापिवसन्क्षेत्रेक्षणार्धतः ६८ गतिंयांयांतिदेवर्षेनयातिक्रतुभिर्नरः दुद्रुवुः
सिंहनादेनयथारण्येपरेमृगाः ६९ तथैवव्यद्रवन्ब्रह्मन्नूपापानिक्षेत्रनामतः योगाखुरोत्थधूल्यावेक्षणोजात
स्रपांडुरः ७० तेनक्षणेनरचितंस्वर्णसदृशंपुरं वशिष्ठश्चवनः कण्वमार्कंडेयोमहामुनी गाधिपुत्रोभरद्वा
जः क्रतुःशक्रस्तथापरः ७१ एतेऋषिवराः क्षेत्रेरक्षिणीरुत्यसर्वशः वर्त्ततेनारदेतस्मेन्नास्तिक्षेत्रसमंभुवि
७२ इतिश्रीस्कंदपुराणेऽत्तरसंहितायांपांडुरंगमाहात्म्येऽमामहेश्वरसंवादेषष्ठोध्यायः ६ ॥श्रीशंकरउवाच
पूर्वकोटोमहादेवी ब्रह्मपत्नीवरानना दुर्गातुपश्चिमेकोटोमहिषासुरमर्दिनी १ मध्येतुभुवनाधीशाचापव
त्तद्व्यवस्थितं अर्धयोजनविस्तीर्णतदर्धायामसंमितं २ क्षेत्राणांपरमंक्षेत्रंसेव्येसुरमुनीश्वरैः क्षेत्रंधनुनी
रदेतद्धन्वीविष्णुःसनातनः ३ लक्ष्यंमहापातकानीतीर्थबाणोमहान्ऋषे एवंसर्वजनानांहिसंसारक्षय
मिच्छतां ४ शरणंसर्वथाक्षेत्रंनारदेतत्प्रकीर्तितं ज्ञानिनोचात्मपातानांमुक्तानांकर्मिणामपि ५ शरण्यंपौं
रीकंस्यादितिसत्यवतीश्रुतिः क्षेत्रेह्यस्मिन्महाविष्णुः सर्वदेवोत्तमोत्तमः ६ आस्तेयोगीश्वरोयापिशक्तिभि
र्नवभिःसह विमलोत्कर्षणीज्ञानाक्रियायोगातथैवच ७ ग्रहीसत्यातथैवाज्ञानानुग्रहाचेतिशक्तयः नारदउवाच

किमर्थमिहसंप्राप्तोभगवान्देवकीसुतः ८ कस्मादत्रस्थितोनित्यंयोगिनांहृदयंगमः एतत्कौतूहलंचास्माब्रूहिमेस
कलेश्वर ९ विचिएःसन्निधिस्तस्मिन्कथमासीन्महात्मनः शंकरउवाच आसीत्पुराद्वापरांतेपुंडरीकोमहामुनि
१० तपःस्वाध्यायनिरतोमतिमान्गुरुपूजने सत्यवादीजितक्रोधोजितेंद्रियगणःसदा ११ तत्तीर्थंचंद्रभागाख्यं
चंद्रोयत्रमहाद्युतिः तपःफलादवाप्तोरुचंद्रभागमवापह १२ चंद्रभागापुष्करिणीनिर्मिताविश्वकर्मणा स
र्वपापप्रशमनीदर्शनान्मुदान्नृणां १३ पुष्कराच्चिगुणासाभूत्संपायात्रचतुर्गुणा समानाबिंदुसरसः स
र्गद्वाराज्जवाधिका १४ निर्मलापुण्यतोयाचपुण्यद्विजनिषेविता सौवर्णैःपंकजैरारैःपुष्पसंघैश्चशोभिता
१५ तस्यास्तटमहाभागःकृत्वाश्रममनुत्तमं चूतखर्जूरजंबीरकपित्थैश्चसमाकुलं १६ दात्यूहखंडिसंदो
हंकूजितंकोकिलस्वनैः गायन्मधुव्रतैर्गुंजद्गुंजत्कारवायुना १७ सतस्मिन्नाश्रमेस्थित्वासुश्रूषणमतंद्रि
तः चकारपित्रोर्धर्मात्मानिरकालंमहामतिः १८ भोज्यैरुच्यावचैर्लेह्यैः स्नानवस्त्रानुलेपने धनैःसुनृत
यावाचापादसंवाहनादिभिः १९ एवंलालयतस्तस्यपितरौधर्मचारिणः आजगामामहापुण्यमाश्रमंपद्म
संभवः २० दृष्ट्वातंपुंडरीकोमूर्त्तिमंतमरविच्छवः दृतांनतिपुटोभूत्वाननामभुविदंडवत् २१ तंपादमू
लेपतितंऋषिदृष्ट्वाचतुर्मुखः उत्थाप्याश्लिष्यविप्रर्षिमपृच्छत्कुशलंतदा २२ पुंडरीकउवाच भगवन्कुत्रा

जंनाथतवसंदर्शनिनमे भूतानांकुत्रालेहेतुः तवसंदर्शनंप्रभो २३ तापत्रयेःप्रपीड्यंतेतावद्भूतान्यलंमुवि
यावत्सतांभवेत्संगस्तत्तएवाशुभक्षयः २४ रत्युत्कासनमानाय्यादत्वातस्यमहामुनिः अर्हयामासविधिव
द्यथाविष्णुंदिवौकसः २५ आस्तोषीद्दिष्यकर्तारंपुंडरीकोमुदान्वितः नमोविज्ञानवीर्यायसर्वसृष्टेकहेतवे
२६ आत्मारामायपूर्णायलोकाधिपतयेनमः नविदंतिमहात्मानःपदवीयस्ययोगिनः २७ सोस्माकंग्रहि
णोविप्रंगृहेदृष्टिपथंगतः किमयाचरितंपूर्वंतपःकिंपुरुषार्चनं २८ ह्यतेकिंदत्तमर्थिभ्योयेनलंदर्शनंगतः॥
अहोतातपमानानांसंसारगृहमेधिनां २९ सद्यःकालेनकृपयाप्रसीदंतीहदेवताः भूमध्यादस्यरु
द्रोभूद्दक्षांगुष्ठान्महात्मनः ३० सर्वावयवजादेवाःसचित्रंममगोचरः दक्षाद्यायेप्रजेशाश्चसनकाद्याश्च
योगिनः ३१ यस्येहितंनजानंतित्तस्मैमुख्यायतेनमः नूनंभगवतोविष्णोर्दर्शनंमेभविष्यति ३२ भवान्ये
नसतांमुख्योममगेहमुपागतः दर्शयंतिहरिःसाक्षात्सेतएवनचापरे ३३ यस्यसंतःप्रसीदंतिहरिस्तस्य
प्रसीदति यथासत्सुहरिर्भोतिनतथाचेदिषुप्रभो ३४ अतोहरेर्दर्शनस्यसूचकंतवदर्शनं शंकरउवाच
एवंब्रुवतिदेवर्षेपुंडरीकमहात्मनो ३५ प्रहस्यतमुवाचेदंविधिर्गंभीरयागिरा ब्रह्मोवाच पुंडरीकमहाभा
गवरंवरयसुव्रत ३६ मद्दर्शनंचभूतानांशश्वद्भवकारकं पुंडरीकउवाच देवदेवममनिष्पापभक्तानुकंपनात्म

ना ३७ देवानामपिदुःप्राप्यंदर्शनंयदभूत्तव अयमेववरोदेवहरौभक्तिः सुनिर्मला ३८ संगस्तत्संगिनां
भूयात्तद्विधानांमहात्मनां येनविष्णुःप्रसन्नःस्यात्तेनतद्दर्शनंभवेत् ३९ तदुपायमहंभूदानजानेब्रूहिमे
प्रभो दयापात्रेषुदीनेषुमादृशेषुमहात्मनां ४० कारुण्यापूर्णचित्तानामनुकंपामयेहृदं ब्रह्मोवाच सिद्धास्यनुग्र
हीतोसिहरिणाकरुणात्मना ४१ दर्शनंतेभगवतोभविष्यत्यचिरादिव पितृशुश्रूषयातुष्टोभगवान्भक्तवत्स
लः ४२ आगमिष्यत्यदीर्घेणकालेनभवदाश्रमं भूमेर्भारापनुत्यर्थंमयेवप्रार्थितोमुवी ४३ आविर्भूतोयदो
र्वंशेवसुदेवस्यसद्मनि नीतोनंदगृहंपित्रावसुदेवेनधीमता ४४ पूतनानिहतातत्रशकटस्यनिपातितः तृणा
वर्त्तोमहादैत्योनीतोवैवस्वतालये ४५ अर्जुनोपातितोब्रह्मन्निहतोबकधेनुकौ ततोगास्चारयन्वृंदावनेरम्ये
महाद्युतिः ४६ गोवर्धनाद्रिप्रवरबलदेवनसंयुतः कृपाकृत्वात्वयिविभुः परंस्वंहविवेद्यहं ४७ आगमि
ष्यत्यसंदेहोवरान्दास्यतितेप्रियान् ततस्तेकीर्तिरतुलाभविष्यतिकलौयुगे ४८ ऋषिदेवमनुष्याणांदृ
ष्ट्वेसेव्यभविष्यति रत्युत्कामगवान्ब्रह्मातत्रैवांतरधीयत ४९ पुंडरीकोपितंनत्वा विवेशस्वंनिकेतनं दृष्ट्वास्व
पितरौतत्रविस्मितोमूदनुस्मरन् ५० अहोभगवताप्रोक्तंब्रह्मणातेनतद्दृष्टः घटतेकिंदुर्भगस्यदुर्लभंहरिद
र्शनं ५१ अपिवादर्शनंविष्णोर्भवेन्मत्समहात्मनः कृपादीनेषुमहतीहरिरित्यनुशुश्रुम ५२ एवंमीमांसमा

नस्यहरेरागमनंप्रति अस्फुरद्दक्षिणनेत्रंपियागमनसूचकं ५३ वृंदावनेमहारण्येदेवकीसूनुरेकदा हलाधे
नुकदेतेयंगोवर्धनगतोविभुः ५४ गोगणंचारयन्यागात्पौंडरीकंसमीक्षितुं पंचवर्षोरविंदाक्षोवनमालीमहाद्यु
तिः ५५ प्रकाशयन्दशदिशोद्विजाश्रममुपाविशत् पुंडरीकस्तदादृक्षास्वाश्रमेतेजउत्तमं ५६ किमेतत्कुतआ
श्चर्यमितिव्याकुलतांययौ अपिसिद्धगणाप्रोक्तंसत्यंकर्तुंवचोहरिः ५७ समागतोन्ययात्तेजः किमेतद्दिभासते
एतस्मिन्नंतरेतत्रगोविंदःप्रत्यदृश्यत ५८ लसत्केयूरकटकमाद्यमौलिप्रभायुतः प्रसन्नवदनः कुंदरदोमंद
स्मितत्रया ५९ युतः कमलपक्षात्रास्पर्धीशिक्थविराजितः कुंडलेमकरेबिभ्रत्कर्णयोरत्नभूषिते ६० कु
टिलालकसंयुक्तोनासापुटलसन्मुखः मुग्धाननोमहाबाहुरूर्ध्वस्कंधोमहाहनुः ६१ सुवृत्तपीवरग्रीवाम
हामणिविभूषणः श्रीवत्सकौस्तुभोद्राजद्विस्तोरस्थलोविभुः ६२ माहमंत्रयुतोसम्यग्वलिवल्गूदरः
प्रभुः मृगेंद्रमध्योगंभीरनाभिहृदसुशोभितः ६३ यत्रसर्वजगत्स्रष्टापितामहसमजायत दिगंबरोदीर्घ
करःकटिसूत्रेणवेष्टितः ६४ बिभ्रत्संवामकरेदक्षिणेपद्ममुत्तमं क्षुल्लकापशिशिक्याभ्यांशोभितोरु
द्वयान्वितः ६५ गूढगुल्फोज्वलन्नानारत्नपूरद्वयसंयुतः देवर्षिगणैः सिद्धैर्योगिभिःसनकादिभिः ६६
अन्यैश्चभगवद्भक्तैर्यत्पादयुगुलंमुने अर्चितंरमयानित्यंवत्सलाचतथामया ६७ लोकानांलोकपालानां

कल्पकानांपरायणं भजवज्रादिभिश्चिन्हैश्चिन्हितंशरणंमम ६९ माहमणिगणाकीर्णेपदकेनविराजितः कि
न्नरगंधर्वैःस्तूयमानः सुरासुरैः ६९ तुंबरुप्रमुखाहाहाहूहूगंधर्वसत्तमाः गायंतिस्तुतस्तोत्रैःपुरतस्त
वाग्रतः ७० विष्वक्सेनादयःसर्वेपार्षदाःपरितस्थिताः गोपस्त्रिपादयोर्धलोकत्रियस्तकरद्वयः ७१ मु
ग्धस्मितानने देवः पांडुरंगोवलोकितः कोटिसूर्यप्रभायुक्तंकंदर्पस्यापिमोहकं ७२ तंदृष्ट्वापरमोत्साही
मुग्धःकर्तव्यकर्मणि पुंडरीकोमहाभागोध्यातुंतमुपचक्रमे ७३ नीलोत्पलदलस्यामंपद्मपत्रनिभेक्षणं
ध्यायेच्छ्रीविठ्ठलंनित्यंजपनस्यकरद्वयं ७४ धावतंतंऋषिंदृष्ट्वास्वाश्रमेपरितःप्रभुः जहासोच्चैस्तदातस्य
भावंदृष्ट्वातुतोषह ७५ ततःसमेत्यदेवस्यपादयोःपततोऋषिः पपातदंडवद्भूमौ हर्षविकृतेंद्रियः ७६
उत्थायसऋषिर्भूयःप्रांजलिःपुष्करेक्षणं अस्तौषीद्दिव्यकर्तारंहर्षगद्गदयागिरा ७७ पुंडरीकउवाच ब्र
ह्मादयस्त्रयोवेदास्त्रयोवेदास्त्रयःपुराणकाः यस्यहितंनजानंतिकथंतोष्यामितंपरं ७८ नाभीयस्यजगद्धातासजातो
विश्वसृजांपतिः तंविश्वकर्तुःपितरंवंदेविश्वस्यरक्षकं ७९ ब्रह्मरुद्रोलोकपालादेवाःशक्रादयस्तथा आसां
वहंतियस्याहंकथंतोष्याम्यहंपरं ८० सर्वाधाराधराजातायस्यपादतलाद्धरः तंभूमेःपितरंवंदेभूतभावन
मच्युतं ८१ महींदुद्धरमाणोयोवराहीर्मूर्तिमास्थितः तंप्रजारक्षकंवंदेवपुरूपीणमच्युतं ८२ योररक्षमनुभी

तंश्वाक्षुषांतरसंभूते नेतारंसर्ववेदानांतंवंदेमीनरूपिणं ९३ सुराणामसुराणांचमथ्नतांक्षीरवारिधिं यो
दधन्मंदरंपृष्ठेतंकूर्मप्रणमाम्यहं ९४ काश्यपीस्थापयामासजलोपरिमहाबलः हत्वादित्यंहिरण्याक्षंतंवंदे
यज्ञसूकरं ९५ हिरण्यकशिपोर्वक्षोविदार्यात्युग्रतेजसा योऽरक्षत्स्वतनयंनृहरिंतन्नमाम्यहं ९६ त्रिपदा
क्रमणंछलाज्जाहारोर्बलेः प्रभुः योऽदितेर्गर्भजोभूत्वावामनंतंनमाम्यहं ९७ अब्रह्मण्यनृपान्हत्वाब्रा
ह्मणेभ्योवसुंधरां आदात्रिःसप्तकृत्वोयस्तंवंदेरेणुकासुतं ९८ बध्नोदधिंमहारक्षोरावणंदेवकंटकं योब
भंजमहाबाहुस्तंवंदेहरपूरुषं ९९ भूमेर्भारापनुत्यर्थंजातोयदुकुलेष्वजः योऽहरज्जारमस्यास्तंवंदेकृष्ण
मिहागतं १० मुक्तयेयोन्यान्महादैत्यानुवीक्ष्ययोमोहकंवपुः धृत्वातान्मोहयामासतंबुद्धंसततंभजे ९१
प्रजाः पाखंडिनोदृष्ट्वाराजरूपधरान्कलौ ममर्दकल्किरूपेणसविष्णुर्मेपरागतिः ९२ नमोनंतावतारा
यनमोनंतसुखात्मने नमोनंतस्वरूपायनमस्तेनंततेजसे ९३ जयमुक्तिपतेनाथजयसर्वगुणात्मक जयाशे
षसुराध्यक्षजयमंगलमंगल ९४ जयाचिंत्यजयातर्क्यजयविष्णोजयाव्यय जयानंतमहाबाहोजयकारण
कारण ९५ त्वामनादृत्ययेमूढाभजंत्यन्यंसतानिह नतारयसतीर्णोत्वातीर्णस्तारयतीवहि ९६ एतच्छ्रु
त्वकथनंश्रृण्वंतिश्रद्धयान्विताः तरंतितेमाहात्मानो ह्युपारंभवसागरं ९७ संसारेस्मंस्तत्रेतस्त्वयिस्था

श्रीराम १५

नममाधव नरकेपिवसामीशपदितेचरणेरतिः ९८ त्वदाज्ञयासृर्जत्येतद्ब्रह्मालोकपितामहः त्वदाज्ञया
संहरतिहरोभूतगणाधिपः ९९ भीतोस्म्यहंदेवदेवउल्लराज्ञवसागरात् अभयंपादमूलंतेशरणागतआ
तुरः १०० तस्मात्तारयदेवेशकृपयाकरुणाकर॥१०१॥ इतिश्रीस्कंदपुराणेउत्तरसंहितायांपांडुरंगमाहात्म्ये
उमामहेश्वरसंवादेसप्तमोध्यायः॥७॥ ॥श्रीशंकरउवाच॥ एवंस्तुत्वामहाभागः पुंडरीकोमहामुनिः
पुनर्जगामवैकुंठं भक्तिनम्रशिरोधरः १ किंमयासुकृतंदेवह्यतेजन्मशतैरपि देवानामपिदुर्दर्शोमम
दृष्टिपथंगतः २ त्वत्कथाश्रवणेकर्णौचक्षुस्त्वद्रूपदर्शने त्वन्मूर्तिचिंतनेचेतोजिह्वात्वन्नामकीर्तने ३ सु
श्रूषायांकरौस्यातांशिरस्त्वत्पादवंदने पादौतेक्षेत्रगमने देहस्त्वद्दास्यसंगमे ४ अनाथानांमृत्युसंसारा
त्रातालंपरमेश्वर सनाथाब्रह्मरुद्राद्यास्त्वमेकोसिसनाथकः ५ सनाथोहंत्वयानाथयन्मेदृष्टोभवा
न्प्रभो त्वयाहंलोकनाथेनमुक्तःसंसारसागरात् ६ एवमुक्तातुदेवर्षेपुंडरीकोमहामुनिः निरीक्ष्यत
न्मुखांभोजंतूष्णीमासीत्सुखान्वितः ७ एतस्मिन्नंतरेतत्रब्रह्मालोकपितामहः सनंदनादिभिःसिद्धैः
दक्षाद्यैश्चप्रजेश्वरैः ८ आजगाममहाविष्णुंद्रष्टुंमुनिभिरन्वितः अर्हंचाप्यागमंतत्रयत्रतोऋषिकेशवो
९ शक्रादयःसुरगणाःगंधर्वाप्सरसस्तथा समागतामहाविष्णुंद्रष्टुंमुनिगणैःसह १० ब्रह्मादक्षा

हरिंतत्रकंदर्पस्यापिमोहकः देवैर्मुनिगणैःसार्द्धननामाद्योषधिरुग्यपः ११ ततोविज्ञापयामासप्रांजलिःप्रणता
तिहं ब्रह्मोवाच देवदेवजगन्नाथमहापुरुषसत्पते १२ प्रसन्नोभवमेनाथलदानामनुकुर्वतः मयादृष्टानिरू
पाणिवहून्यसुरसूदन १३ अद्भुतंरूपमक्तेनदृष्टंनक्रतुपुरा भवदागमनंपूर्वमुनेःप्रोक्तंमयात्वहि १४ आग
तोसगवानद्यसत्यंकर्तुंवचोमम ऋषिरेषमहाबुद्धिर्भक्तस्तेमक्तवत्सल १५ सत्यसंधःशुचिर्दांतोमद्भुसर्व
पकारकः पितृशुश्रूषणरतः क्रोधलोभविवर्जितः १६ त्वदागमनमाकांक्षन्नास्तेपुष्करणीतटे चरोस्यामि
मतोदेवकामपूरामवान्यतः १७ तावत्कालमृणामार्तिर्यावत्त्वद्दर्शनंनहि एवमुक्ततोब्रह्मातूष्णीमासह
रःपुरा १८ तद्रूपंनयनानंदंवीक्ष्यनारदतोषितः ततोहंप्रांजलिर्देवमवोचमखिलेश्वरं १९ एषनःसर्वदेवानां
मुनीनांमुनिपुंगवः प्रियःसुहृत्तमोस्यंप्रसादंकर्तुमर्हसि २० देवाऊचुः आस्तितेचरणांभोजंयत्सर्वाक
सुरेश्वर कृपात्वास्मासुभवतःकिंकरेष्वनुयायिषु २१ ऋषिरिशेवरोदेयामक्तस्यतवपादयोः ततोदेवगणाः
सर्वेप्रणम्यप्रणतार्तिहं २२ कृतांजलिपुटाःसर्वेस्थितास्थुरग्रतः अथतानाहदेवेशोसुग्धहासावलो
कनः २३ निरीक्षन्कृपयासतंपुंडरीकंमहामुनिं श्रीभगवानुवाच ब्रह्मन्नस्मवरंतुमागतोहमृषेरिह २४ श्रीराम
पित्रोराराधनात्तस्यप्रसन्नोवरदेश्वरः यूयमप्यागतादेवाः साहाय्यंकर्तुमस्यवै २५ युष्माकमुपपन्नंतन्म १६

क्तानांमदात्मनां परतापनयत्नसाःपरहर्षणहर्षिताः २६ मद्भक्तायांरतानित्यंभक्तास्तेतीवमेप्रियाः मद्भ
क्तेषुपरात्रीतियेषांदेवामहात्मसु २७ तानुद्धरिष्याम्यचिरातेभ्यस्तेतीवमेप्रियाः मद्भक्तपूजनेतुष्टिर्यथास्या
न्ममपुत्रकाः २८ नतथातुष्टिरत्यंतंदोभक्ताःप्राणाधिकाममअश्वमेधाधिकायत्ताः सुतीर्थान्यखिलान्यपि २९
जपहोमादयोभक्तेःकल्पानार्हतिषोडशीं सर्वधर्मविहीनोपिमद्भक्तस्तेन्ममप्रियः ३० कर्त्तासर्वस्यधर्मस्यभक्ति
हीनोनमेप्रियः नतथामेप्रियतमंवैकुंठनगरोत्तमं ३१ यथामद्भक्तगात्राणिमच्चिन्हैरंकितान्यलं बहुनोक्ते
नकिंदेवाःमयितिष्ठंतिमामकाः ३२ भक्तेष्वेतेष्वहंशश्वदसाम्यत्वनसंशयः पश्यंतिपापदृष्ट्यायेमद्भक्तान्पा
पचारिणः ३३ तेमांपश्यंतिपापानेचक्षुषानात्रसंशयः मद्भक्तिर्हिमयादृष्टायुष्मास्वपिविशेषतः ३४ यद्य
यमस्यक्रुपयासाहाय्यंकर्तुमागताः अयंहिमेप्रियतमःपुंडरीकोद्विजोत्तमः ३५ दास्येकामवरानस्मैयुष्माक
मपिदुर्लभान् भक्तानांकामपूरत्वंशश्वन्मेव्रतमुत्तमं ३६ इत्युक्तोतान्हरिर्भक्तंदृष्ट्वोवाचसमंत्रिव तुष्टोहं
तेद्विजश्रेष्ठभक्त्यापित्रोस्वशूजनात् ३७ वरंवरीष्वदास्यामात्मानमपिते मयिप्रसन्नेवरदेदुर्लभंतव
किंमुने ३८ भक्तानांभाग्यरूपोहंविशेषणतवानघ शौकरउवाच एवमुक्तोवरंपुंडरीकोमहामुनिः ३९ वरंव
व्रतदाब्रह्मन्तमेवसुरनायकं पुंडरीकउवाच नमाचेहंवरान्देवविषयान्क्षणभंगुरान् ४० कल्पवृक्षेप्रसन्नेतु

कूष्मांडनीवदुर्भगः याचेहंत्वांवरंनाथनदृष्टंनश्रुतंपुरा ४३ प्रसन्नेडुर्लभंयाचेडुर्लभंत्वांवरंप्रभो अनेनचारुरू
पेणचारुहासावलोकनः ४२ लोकानामीप्सितान्कामान्दास्यतिष्ठतमत्रहि पश्यंतुसर्वभूतानिभक्तवत्सलतां
तव ४३ देवानामपिदुःप्रापंकारुण्यान्मनसंस्थितं संसारसागरेघोरमज्जंतोडुःखजीविनः ४४ त्रातारमिहमां
कान्दृष्ट्वागच्छंतुतेपदं क्षेत्राणामुत्तमंक्षेत्रंकृपयातेभवत्विदं ४५ तथैवसर्वतीर्थानामेतज्जगतुत्तमं स्थान्वि
तानहीनानांमूढानांपापिनामपि ४६ दर्शनात्तेभवेन्मोक्षःप्रार्थयामिपुनःपुनः तीर्थमेतज्जगद्देवमन्नामांकितमु
त्तमं ४७ एतानेववरान्विष्णोरणेनाप्यन्मनीषितं सदातंचारुरूपेणतिष्ठकल्पसुरद्रुम ४८ शंकरउवाच श्रुत्वाम
कवचोविष्णुर्जहासोच्चैर्निरीक्ष्यतं कृपयापरयामतमुवाचेदंमहामुनि ४९ श्रीभगवानुवाच डुर्लभायाचितावत्स
नूनंराः सुरमुनीश्वरैः दास्येतानपितेनात्रिप्रसन्नमविडुर्लभं ५० वसामितीर्थमध्येहंक्षेत्रमध्यतथैवच स्थित्वा
र्थंयथालोकेमदीयेमामकैः सह ५१ गंगादिसर्वतीर्थेभ्यस्तीर्थमेतन्महाफलं भविष्यतिकलौनृणांविशेषेणद्वि
जोत्तम ५२ क्षेत्राणामपिसर्वेषामेतज्जगतुत्तमं अज्ञानिनाज्ञानिनांचमुक्तिमुक्तिफलप्रदं ५३ ममाश्रयामहा
भागसर्वमेतद्भविष्यति देवानामपिसर्वेषांउत्तमोहंस्वतंत्रतः ५४ वत्स्यामिसर्वदाब्रह्मक्षेत्रेत्वन्नामसंज्ञके शंकरउवा
च एवंदत्वावरान्विष्णुःस्थितवांस्तत्रनारद ५५ विदितानेनदानेनभूत्वानूलांतिगृह्णतियः स्वयं अज्ञानुग्रहबुद्ध्यो

विष्ठलःकथ्यतेबुधैः ५६ ततोब्रह्मादयोदेवाऊचुःप्रांजलयोविभुं जीवतान्मेरपत्नामस्माकमपिडुर्लभं ५७ अक
रोत्सुखंतातनराणांब्रह्मयत्परं इतिहासपुराणानिश्रुतयःस्मृतयस्तथा ५८ नविद्युस्तंनलोकस्यरूपवानूदृष्टि
गोचरं ददातिद्युतरुःकामानाश्रितानांतुमुक्तिदः ५९ पुंडरीकाख्यद्युतरुः सर्वेषांमुक्तिदोनृणां नमःपरायशाय
तानानंदैकमूर्तये ६० भक्तानुग्रहरूपायविष्णवेविश्वकेतवे वयंतेकिंकराःसर्वेवाहामस्वानुशासने ६१ त्वत्पा
दपंकजेभक्तिर्भूयात्तद्दासंसंगमः एवमामंत्र्यतेविष्णुंमुनिंचसुरसत्तमाः ६२ जग्मुस्त्रिविष्टपंतेभ्योकृष्णश्चके
नमस्तथा देवदुंदुभयोनेदुःननृतुश्चाप्सरोगणाः ६३ तुष्टुवुर्मुनयः सर्वेपेतुःकुसुमवृष्टयः लोकाः सर्वेचासंसु
स्तंपुंडरीकंमुनीश्वरं ६४ ततोहरिर्हरूपेणस्थितवांस्तत्रनारद मायूरस्त्रकधरोनित्यंकटिन्यस्तकरद्वयः ६५
शोभस्त्रपीठरूपेणतत्पादतलमाश्रितः द्विधास्थितामहालक्ष्मीः श्रीरितिह्रीरितिप्रभुं ६६ उपास्तेचामरैर्दिव्यैः
पार्श्वयोरुभयोरपि छंदोमयामहाबाहुस्त्रिष्टत्यग्रेखगेश्वरः ६७ कृतांजलिर्विनिजास्यमुखन्यस्तविलोचनः द
क्षिणेभगवान्ब्रह्मामुनिभिःसनकादिभिः ६८ उपास्तेप्रांजलिर्देवस्तत्रैर्नानाविधैःप्रभुं वामेहंप्रांजलिर्भूत्वा
रुद्रैरकादशैःसह ६९ उपास्तेनारदस्तत्रविष्णुंलोकगुरुंप्रभुं देवाःशक्रादयः सर्वेएतद्देशेवसंतिहि ७० दृष्ट्वत्व
यानारदेषाभक्तवत्सलताहरेः हत्प्रेक्षयोगिभिर्ध्येयोलोकदृष्टिपथंगतः ७१ द्विधारूपेणतत्रास्तेक्षेत्रेतीर्थसुरं

तकः पश्चिमाभिमुखस्तीर्थक्षेत्रपूर्वमुखोविभुः ७२ उभयोर्मध्यदेशोयः क्षेत्रराजः सउच्यते तीर्थतुमंडलमुच्चै
सौवर्णरत्नभूषिते ७३ महामणिगणाकीर्णपीठेसेव्यःसुरोत्तमैः शक्तिभिर्नवभिर्युक्तोवासुदेवादिभिःसह ७४ प्रा
जमानश्चंद्रसूर्यकोटिदीधितिरच्युतः वेदःपुराणैःसिद्धांतैःसेवितोलोकपालकैः ७५ तथैवपुंडरीकेणचास्तेलो
कगुरुर्हरिः तत्तीर्थवंदनात्तस्यपूजानारदजायते ७६ स्नानात्पानान्नमस्काराततीर्थतत्पावनंस्मृतं महापातकि
नोयत्रस्नात्वाशुध्यंतिनारद ७७ अद्यापिश्रूयतेरात्रौजयशब्दोमहात्मभिः धूपधूमोमहास्तत्रदृश्यतेसद्दैव
हि ७८ तीर्थसर्वोत्तमेद्यापिमध्याह्नस्नातुमंनसा आयांतिसर्वतीर्थानित्यास्त्रिशत्रदेवताः ७९ रूपंरूपमयो
मेध्यविष्णोस्तिष्ठंतियेनराः देवास्तेनारदज्ञेयानररूपेणसंस्थिताः ८० ब्रह्मघ्नोवासुरापोवा चौणहागुरुतल्पगः
स्तेयोवारक्षकीगोवामातृहापितृहातथा ८१ कृतघ्नोमित्रधृक्चैवपरदाराभिमर्षकः निंदकोऽनिजधर्मस्थः पा
खंडप्रवरोऽशुचिः ८२ सर्वोभिमर्षीसर्वत्रभोक्तासर्वापत्प्रदापकः हेतुकःसद्विरुत्सृष्टः सर्वपापहृदेवहि ८३ सर्व
तेपापिनोब्रह्मन्मुच्यंतेतीर्थमहाफले विष्णोरुपद्रयनत्वामुच्यंतेसर्वपातकैः ८४ ध्यात्वातीर्थस्थितंविष्णुंदृष्ट्वा
क्षेत्रस्थमच्युतं सर्वान्कामानवाप्येहसायुज्यंलभतेहरेः ८५ किंबहूक्तेनदेवर्षेनास्तिनास्तिकलोकानां चारण्यंपाव
नंचान्यद्विष्णोपादानुसेवनात् ८६ प्रायश्चित्तानिसर्वाणिप्रोक्तान्यृषिमुनीश्वरैः विष्णोःस्मृतिविहीनस्यनश्यंति

जनयंतिहि ८७ नदृष्टोनस्कृतोब्रह्मन्नेक्षणेनारकीपुरा सर्वपापाग्निलिप्तांगोनांगारंस्पृशतेद्रुमिः ८८ अ
स्तिकश्चिद्धरिःपूर्णः सर्वदेवोत्तमोत्तमः रतियस्यमतिस्तस्यनास्तिनारकदर्शनं॥ ८९॥ इतिश्रीस्कंदपुराणउत्तर
संहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेअष्टमोध्यायः॥ ८॥ ॥श्रीशंकरउवाच॥ शिलाबुद्धिर्नकार्योच
त्तनारदकर्हिचित् सानानंदात्मकोविष्णुर्यत्रतिष्ठत्यचिन्मतः १ तीर्थक्षेत्रेस्थितेविष्णौशिलाबुद्धिंकरोति
यः सयातिनरकंघोरंपुनरावृत्तिवर्जितं २ अत्रसामान्यतोमूढाः कौतुकाः पापिनोमिथः प्रतिमेतिविकत्थंते
दृष्ट्वानंदात्मकंवपुः ३ येध्यायंतिसुराःसर्वेयंध्यायंतिचतुर्मुखः अहंचयत्पुरोनित्यंलंचनारदमत्परः ४
मुनयःसनकाद्याश्चयंध्यायंत्यनिशज्ञानाः सएषपौंडरीकस्थोभक्तकल्पद्रुमःस्वयं ५ तत्रपाषाणबुद्धियेनराः
कुर्वंतिपापिनः तेषांनिरयपातःस्याद्यावदाभूतसंप्लवं ६ द्वारकायामयोध्यायांमथुरायांचनारद कुरुक्षेत्रे
रिक्षेत्रेनैमिषेपुष्करेतथा ७ पुरुषोत्तमेगयायांचगंगासागरसंगमे महेंद्रपर्वतेरम्यसेतुबंधेमहाफले ८
श्रीरंगाख्येमहाक्षेत्रेकरजेशयशायिनि एतेषुभगवान्विष्णुः साक्षात्तिष्ठतिनारद ९ यथाविष्णुर्यथारामोमथु
राश्रहरिः स्वयं तथैवात्रस्वयंव्यक्तः साक्षाद्विष्णुर्हितिष्ठति १० अज्ञानीनांमनुष्याणांचक्षुष्कमललोचने
यथासीन्मर्त्यबुद्धिर्हितथात्रापिडुरात्मनां ११ आविर्बभूवयोविष्णुर्देवक्यांब्रह्मणार्थितः सएवास्तेपौंडरीके

भक्तानुग्रहकाम्यया १२ नमंजंतिचयेमर्त्यास्तेषांपुण्यंश्रृणुष्वमे परिक्रमंतियेविष्णोः शयांमंदिरसंस्थितां १३
अलंश्रांगतिमायांतियोगिनामपिदुर्लभां पुरतःपद्मनाभस्यप्रांजलिःसंयतेंद्रियः १४ दृष्वासुग्धाननंयातित
स्तंतमसःपरं पुरतोयेमहाभागाभक्तिगद्गदयागिरा १५ नृत्यंतिकीर्तयंतश्चलितार्कयांतितत्पदं ज्ञानीचाप्य
थवाज्ञानीरंगदेशंसमाश्रिताः १६ कृतद्वयोभवेत्सद्यः पुण्यपापविवर्जिताः रंगदेशंसमाश्रित्यभक्त्याविष्णुं
भजंतिये १७ मुक्तास्तेमानवास्तेषामुहूर्त्तार्धनिषेवणात् २पकाखिहरेवक्त्रंधूपधूम्रंसुखावहं १८ चारुहासंप
श्यतोहंपुण्येसंख्यांब्रवीमिते राजसूयसहस्रेण दीक्षितस्यमहात्मनः १९ यत्फलंतत्फलंप्राप्यमोदतेहरिमं
दिरे नीराजनेमहाविष्णुर्मुखचंद्रसमप्रभं २० मंदस्मितंमहापुण्यंमारस्यापिविमोहकं नराणांपश्यतांपुण्य
महिमानंमहामते २१ नराणांपश्यतांपुण्येमहिमानंमहामते नजानेहंनापिदेवान्पुराणानियोगिनः २२ ब्रस
णोममविष्णोश्चप्रियास्तेनरसत्तमाः सोपहारंहरिंदृष्वापातिविष्णोः सरूपतां २३ माहापातकिनोपिस्यु
मत्सेवाः सज्जनोत्तमाः संमार्जनोपलेपाभ्यांमंदिरंमंड्येतिये २४ तेमंदिरहरिर्नित्यंनदंतिपितृभिः सह सं
मार्जनेनसर्वेपिदेवाः स्वर्गंप्रपेदिरे २५ मार्जनेनमहाभागमहेंद्रोभवतिध्रुवं मार्जनस्यफलंसम्यक्कोनजानेहंमह
मुने २६ नापिवाणीपतिर्वेधानशक्नोनचदेवताः सहस्रंसमार्जनेनैवब्रह्महापिविमुच्यते २७ कहिंचिद्बलिदान

श्रीराम १९

स्यग्रहणायागतःखगः मार्जितंपक्षवातेनकिंचिद्देवालयांतिके २८ ततःकालेनमहतापंचत्वमगमत्खगः नी
तःपुरंदरपुरंविमानेनार्कवर्चसा २९ दिव्यवर्षसहस्राणिभुक्त्वाभोगान्सतत्रवै पुनरागत्यतत्रैवपोंडरीकेद्विजो
भवत् ३० वेदवेदांगपारस्योभक्तिमान्गरुडध्वजे अतीतजन्मभावेनतस्यबुद्धिर्बभूवह ३१ रजःसंमार्जने
विष्णोर्मंदिरेबलनंदन अपंचत्वंगतंतेनहरेर्मंदिरमार्जनं ३२ तेनपुण्येननष्टाशस्त्रैलोक्येसुरार्चित तत्रोषि
त्वाचिरंकालंपुनर्भूतलमाश्रितः ३३ सुकीर्तिर्नामराजासीत्सार्वभौमोदृढव्रतः भुक्त्वासभूपतेर्भोगान्सु
मभ्यर्च्यजनार्दनं ३४ अवापदुरवापंसतद्विष्णोःपरमंपदं तस्मात्संमार्जनेयत्नंकुर्याच्चित्यमतंद्रितः ३५ रति
हासपुराणानियःपठेद्देवसन्निधौ सयातिपरमंस्थानंविष्णोरवनसेश्वरः ३६ स्नात्वातीर्थमहापुण्येदृष्वा
विष्णुंसुखावहं श्राद्धंकुर्याच्चरत्नैश्चपितरोमुक्तिमाप्नुयुः ३७ क्षेत्रेतस्मिन्महाविष्णोः पादोदकमतंद्रितः पि
बत्यशेषपानामौषधंचपिबत्यसौ ३८ केदारजलपानाच्चस्वर्गंगोदकपानतः अधिकंपुण्यमाप्नोतिविष्णुपा
दोदकंपिबन् ३९ उच्छिष्टभोजनात्तस्यमहाविष्णोर्महात्मनः अनंतंफलमाप्नोतिदुर्लभंयत्सुरैरपि ४० विष्णोः
पादोदकंपीत्वामुक्त्वातुलसीषकं योगतिंयांतिमनुजानतांयांतिकुत्रतत्तमः ४१ परितोदेवदेवस्यदशहस्तप्रमा
णतः क्षेत्रंपुण्यतमंप्रोक्तंविष्णोःप्रियतमंमहत् ४२ विष्वक्सेनादयःसर्वेपार्षदाःसुरसत्तमाः वसंतिसर्वदातत्र

हरेःप्रियचिकीर्षया ४३ सर्व्वेसुताःस्वरूपास्तत्रतस्योपासनलालसाः वसंतिसर्व्वदातत्रकोटिशोदेवकन्यकाः ४४
ज्ञानिनश्चमहाभागामुक्तास्तत्रवसंतिहि यदुक्तिष्टादिकंतत्रकुर्य्यादज्ञानमोहितः ४५ आमूतसंप्लवंयावन्नरका
नश्नतेहिसः तस्यानंयेमहाभागाभूषयंतिविभूतिभिः ४६ दीपपुष्पादिबलिभिःरंगमाल्यैकपातथा तेभूषिता
महात्मानोभूषणैरुत्तमैर्भृशं ४७ तत्रवपार्षदैःसार्द्धंक्रीडंतिभवर्जिताः क्षीरेणपूतमिश्रेणतत्स्नानंस्मापयं
तिये ४८ हरेःप्रियतमोनास्तितैःसमोभुवनत्रये वेदपारायणंतत्रकुर्य्याद्विद्यामवाप्नुयात् ४९ जपहोमादिकंतत्र
कृतंकोटिगुणंभवेत् स्वेतद्वीपंसुरैःपूज्यंवैकुंठंनगरोत्तमं ५० क्षीराब्धिमंदिरंरम्यंकल्पानार्हंतिषोडशी महा
पातककोट्योपिदर्शनाद्यांतिसक्षयं ५१ स्मरणान्मुच्यतेजंतुःसंसारादुःखसागरात् पितॄनुद्दिश्ययोपिंग
न्दद्यात्तत्रसमाहितः ५२ मोदंतिपितरस्तस्यतत्रवैहरिसन्निधौ देवस्योत्तरमागेतुयात्किंचिच्चिकीर्षतेनरः
५३ पुण्यंवायदिवापापंतत्कृतंफलंभवेत् गंगाद्वारेप्रयागेचगंगासागरसंगमे ५४ कुरुक्षेत्रेमहापुण्यकेदा
रेनैमिषेतथा वसतांयुगसाहस्रांयत्फलंमुनिभिः स्मृतं ५५ क्षणार्धेनतुतत्पुण्यंपांडुरंगस्यदक्षिणे निवृत्तो
शानदेवोतुशौरेवाशौरवाननः ५६ निश्चित्यरोषदुष्टात्मानोद्यांचिकीर्षया भूतप्रेतपिशाचानांनराणां
दुश्चारिणां ५७ निग्रहायमहाबाहुःस्वपितस्तत्रविष्णुना रक्षायांक्षेत्रराजस्यतत्रस्थानांमहात्मनां ५८

श्रीराम २०

आज्ञापितोमहासत्वोहरिणातिष्ठतिप्रभुः अतएवमहाभागतत्क्षेत्रंदुश्चारिणः ५९ नक्षेत्रंवीक्षितुंतत्रते
जसातस्यधर्षिताः अवेक्षणान्मुक्तयोग्यानूर्ध्वाधोकल्पचारिणः ६० उच्चाट्यतिष्ठान्यत्रक्षेत्रात्तस्माद्धरिः
प्रभुः कश्चिद्विद्याधरःश्रीमान्विमानेनचरन्नभः ६१ स्वजनैरनुगायद्भिः सर्व्वाभरणभूषितैः दिव्यस्त्रग्गंध
माल्यैश्चभूषितोभूषणोत्तमैः ६२ पीतवासामहातेजाः सूर्यवद्भगनेश्वरः सचचारमहाविष्णोर्मंदिरोपरि
पद्धीः ६३ तंदृष्ट्वाक्षेत्रपालोसौचुकोपचननादच उत्पपातमहावेगान्नयेनवत्खेचरस्वयं ६४ आरुरो
हविमानंतद्भग्नंविनिपातयन् तंगृहीत्वामहासत्वोनिपात्यधरणीतले ६५ विचकर्षमहासत्वः सर्पराजंय
थाखगः मरणाभिमुखंदृष्ट्वाभैरवेणार्दितंप्रभुः ६६ विद्याधरंरक्षपोनिंमहाविष्णुन्यवारयत् पांडुरंग
वाच नैवबध्योमहाबाहोलयायमुपदेवकः ६७ त्यजतांभग्नदर्पायंशयानःपतितोभुवि रत्नुक्तादेवदेवन
तंतत्याजमहाबलः ६८ विद्याधरस्तेनमुक्तआत्मानंमदगर्वितं विश्वंपोत्थायभग्नांगोदद्दशोत्तमकेशवं ६९
पांडुरंगंमहाशोत्तंसर्व्वाभरणभूषितं शंखपाणिंविशालाक्षंस्फुरत्कुंडलमंडितं ७० दृष्ट्वासंचिंतयामासको
यंलक्षणसंयुतः प्रायेणविष्णुनाभाव्यंनोचेन्ममभवेद्भयं ७१ दुरात्माहंमहाविष्णोर्मंदिरोपरियानगः त
तस्तस्मिन्क्षणेभूमौकेनाचित्पातितोस्म्यहं ७२ भग्नयानंभग्नदर्पोदद्दशोतंसुरेश्वरं भग्नदर्पंरविदृश्योहरि

श्रीराम २१

र्नवमदोद्धतः ७२ रतिसंतप्तहृदयोनंविष्णुंशरणंययौ बद्धांजलिः प्रणम्याहप्रकिरन्हृदयागिरा ७३ पापोहं
पापकर्माहंत्राहिमांपापनाशन अपराधसहस्राणिमद्योवत्सह्यन्यलं ७४ दुष्टबुध्यामहाविष्णोक्षंतुमर्हस्यति
क्रमं अनुग्रहायदंडोयंकृतोयेनसुरेश्वर ७५ श्रीमदांधोमहाबाहोनेतत्कर्मकरोम्यहं रतिरानुचरोमर्त्यश्रीम
दांधोखिलेश्वरं ७७ नपश्यत्यखिलत्यागीपश्यतित्वामधोक्षजं मूढोहंत्राहिदेवाप्रसन्नोभवमंजन ७८
मत्तिर्ममपुनर्नस्यात्सदामहतिक्रमे तदातथाचरामीशविमानेनजगत्त्रयं ७९ स्थितस्यनरकेवापित्वत्पादे
रतिरस्तुमे इत्युक्तंपरिक्रम्यप्रणम्यजगदीश्वरं ८० गतोविद्याधरोविष्णोर्दर्शनान्निर्धृतःस्वयं एवंप्रभावयु
क्तक्षेत्रंतीर्थक्षेत्रपतिःप्रभुः ८१ सर्वदोमुनिजैर्नित्यं क्षेत्रस्थैश्चविशेषतः योगक्षेमकरायस्मात्तत्राख्यानाम
हात्मकां ८२ तस्मात्सर्वप्रयत्नेनद्रष्टव्यःप्रथमंनरैः अर्च्चनीयोनमस्कार्यः प्रार्थनीयश्चसर्वदा ८३ वमपूज्य
हरेःपूजाकृतासवतिनिःफला तस्मपूजाहरेःपूजाकर्तव्याचविशेषतः॥ ८४ ॥ इतिश्रीस्कंदपुराणउत्तरसंहिता
यांपांडुरंगमाहात्म्येउमामहेश्वरसंवादक्षेत्रपालप्रभावानामनवमोध्यायः॥९॥ ॥नारदउवाच॥ विचित्रमिद
माख्यातंत्वयामाहात्म्यमुत्तमं क्षेत्रस्यक्षेत्रपालस्यतत्रस्थस्यहरेःप्रभोः १ तीर्थस्यचविशिष्टस्यपुंडरीकस्यचे
मुनेः कतिद्वाराणितत्रासन्तथाद्वारस्थदेवताः २ तथान्यदपिदेवेशतस्मिन्क्षेत्रेसुविस्मयं तीर्थादिकंम

हापुण्यंविद्यतेचब्रूहीहिमे ३ सूतउवाच इतिपृष्टोमहादेवोनारदेनचधीमता प्रोवाचप्रगवान्देवोसंस्मर
न्पुरुषोत्तमं ४ शंकरउवाच शुभमालानामनदीरम्यायत्रसुसंगता तत्तीर्थंसुमहापुण्यंप्रयागादधिकंभुवि
५ क्रीडंत्यद्यापिदेवर्षेदेवास्तत्रसभर्तृका तत्रदेवीमहाभागाब्रह्माणीलोकपूजिता ६ पूर्वद्वारेमहापुण्येविष्णु
नास्थापितापुरा अर्चितासर्वदानृणांसर्वाभरणभूषिता ७ स्नानैर्वस्त्रैस्तथागंधैःपुष्पधूपादिभिःसु
भैः उच्चावचैस्तथानेकैद्रव्यैः पूजितासर्वमंगला ८ आशीष्टान्सकलान्कामान्भक्तानांभक्तवत्सला तथानि
रीक्षतोजंतुः सर्वत्रोभवतिध्रुवं ९ तस्मात्सर्वप्रयत्नेननमस्कार्यानरैः सदा अश्वत्थरूपीभगवान्यत्रास्ते
सचतुर्मुखः १० सुराश्चमुनयोयत्तास्तत्रस्थाःस्थावरादयः जपहोमादिकंतत्रकृतंभवतिचाक्षयं ११ षण्मा
ससेवनात्तस्याऽष्कर्मापिविमुच्यते स्नात्वातस्मिन्महातीर्थसंगमेपितृदेवताः १२ तर्पयित्वामहामायांस
मभ्यर्च्यसमाहितः उपोष्यपरयाभक्त्याब्रह्मलोकमवाप्नुयात् १३ तत्रभुक्त्वामहाभोगान्ब्रह्मणासहमा
नवः गच्छेत्ततःपरंस्थानंयतोनावर्ततेपुनः १४ चंद्रसूर्योपरागेचस्नात्वातत्रविमुच्यते ब्रह्महत्यादिभिरपि
किमन्यैःपातकैर्नरः १५ तस्मात्सर्वप्रयत्नेनसेव्यंसुरमुनीश्वरैः हरेर्दक्षिणभागेतुमहत्कौतूहलान्वितं १६
पुण्यंपापक्षयकरंयत्रतिष्ठतिविभवान् सिद्धविद्याधरैर्यक्षैर्मुनिभिश्चसमन्वितः १७ स्थापितोहरिणापूर्वं

कपयाब्रह्मनंदन दृष्ट्वाखिंगास्तिंतांतुबुचुस्तेहतबुद्धयः १८ सिद्धानामीश्वरत्वाच्चसिद्धेश्वरइतीरितः पुण्या
वतीनदीयत्रसंगतात्रीमकन्यया १९ तस्यास्नानेनवेमर्त्यास्तानवान्गुणवान्भवेत् संगमःसर्वपापघ्नोसर्वदेवनि
षेवितः २० वृक्षपाषाणरूपेणदेवास्तत्रसमासते स्नानान्मुक्तिप्रदंनृणांमहापातकिनामिव २१ कस्मिंश्चत्र
महाव्याधश्चापपाणिश्चरन्वने मृगयातुगतस्तत्रभीतास्तेडुडुवुर्मृगाः २२ अनुधावन्नरुरुंतेकंतेषांमध्ये
महाबलाः सतुतस्यभयाद्भीतः पतमानोमहीतले २३ पुनर्भयाच्चडुड्डावनदीतीरंसवीरुधं तत्रक्रुद्धेन
विद्धश्चभल्लेनसनदीतटे २४ मुंचन्नार्तस्वरंदीनोजलमध्येपपातह पुण्यतीर्थजलक्लिन्नंदहंतत्याजपातकं
२५ ततोविमानमारुह्यस्वर्णरत्नविभूषितं विद्याधरपतिर्मूत्वारेमेनगवपुर्धरः २६ शरीरंतस्यतद्भ्रष्टं
दृश्यतेयेनकेनचित् तदाश्चर्येनिरीक्ष्यार्थंव्याधोविस्मितमानसः २७ निमज्यतीर्थपीतापोजातः शुद्धमतो
महान् विसृज्यस्वस्यदेहात्मंतीर्थवासीबभूवह २८ ततस्तेवेवतीर्थंचगतालोकमनुत्तमं तस्मात्तीर्थम्
तानांतुनास्तिनारदसंस्मृतिः २९ अज्ञानीचूनमस्कृत्यस्नानवान्भवतिध्रुवं श्रमेरंतमहाभागादेत्यस्ति
ष्ठंतिकोदिशः ३० विद्युत्प्रभाविशालाक्ष्यः सर्वाभरणभूषितः आराधनेसदासक्ताहरेरद्भुतकर्मणः ३१
धूपदीपैश्चनैवेद्यैरर्चयंतिसदाहरिं अदृश्यंतद्विचंद्रलनूयत्रतिष्ठंतितास्त्रियः ३२ क्रीडंतिविष्णुनासार्द्धं

यथागोकुलयोषितः नीराजनंप्रकुर्वंतिसंध्ययोरुभयोर्हरेः ३३ गायंतीत्यद्भुतज्ञास्तावासुदेवप्रियाःप्रि
यं ध्यायंतितद्विदांभोजंयथानारदयोगिनः ३४ गीभिस्तुवंतितंभक्त्यायथास्तुतिगणाहरिं शृण्वंतितत्क
थानित्यंयथाभक्तास्तदाश्रयाः ३५ तस्मिन्तीर्थेचयेस्नात्वानमस्यंतिचनास्त्रियः तेगच्छंतिहरेर्धामयत्रगत्वा
नयांतिहि ३६ विष्णुनाकीर्तितंतत्रचिन्हितंचशिलातले स्थापितोचशिलाष्टपादोयत्रसुशोभनो ३७
लंघनक्रीड्यातत्रदृश्यतेहरिणाहतो तौदृष्ट्वातुनमस्कृत्यनयातियमसादनं ३८ संगमादुपरिस्नात्वा
संगमोनामराक्षसः निर्जितोहरिणापूर्वंतत्रागत्यसरित्तटे ३९ उपर्यात्मानमादायशिलांशेतेभयादिह
भोः भूमोगुदंहरिर्दृष्ट्वाप्रहस्यजगदीश्वरः ४० शिलामाक्रम्यतद्दृष्ट्वाशूर्णयामासदुष्टहा वेणुनादनदे
वानांमनःश्रवणमंगलः ४१ अद्यापितत्रदेवर्षे दृश्यतेचरणाब्जौ वेणुनादस्थिताकारौदर्शनान्मोक्षदा
यकौ ४२ प्रपदाक्रमणेनैवसंपूर्णाक्रमणेनच तत्रस्नात्वामहानद्यां दृष्ट्वातौचरणौहरेः ४३ अमीष्टा
न्सकलान्कामानुपभोग्यान्भवेन्नरः भुक्त्वानूतत्रदेवर्षे दध्यन्नममृतोपमं ४४ क्रीडन्गोपगणैःसार्द्धं
पाल्यगोपवपुश्चसः दध्योदनस्यसिक्थानिदृश्यंतेद्यापिनारद ४५ निवृक्षस्यसंगनितथाईशफलानिच
तदुच्छिष्टाशनादेवसायुज्यंलभतेध्रुवं ४६ जपहोमादिकंतत्रविशिष्टफलदंभवेत् पश्चिमद्वारमाश्रित्यतिष्ठत्य

मरवंदिता ४७ भुवनेश्वरीमहादेवीभूतैः सैः परिवारिता भक्त्यासंपूजिता नृणांअभीष्टफलदायिनी ४८
उत्तरद्वारमाश्रित्यचंडिकासुरमर्दिनी हरराद्देशतस्तिष्ठत्युग्रदंष्ट्राभयानका ४९ तत्रैम्यापुण्यतोयासंगताम
रणीनदी तत्रस्नानंचदानंचपशस्तंपुनिभिः स्मृतं ५० दुर्गाभगवतींतत्रपूजयित्वासुरार्चितां सुरामांसादि
भिर्भक्त्याप्नुयुः सर्वसंपदः ५१ भूतग्रस्तस्तुतांदेवीतत्रात्तस्माद्विमुच्यते ग्रहग्रस्तःपुरुषोविग्रहस्यान्न
संशयः ५२ अंतर्द्वाराणिचत्वारिकथितानितवानघ बहिर्द्वाराणिचत्वारितानिमेगदतःशृणु ५३ करवी
रपुरंनामपश्चिमद्वारगंपुरं शोभितंगोपुराट्टालप्राकारगृहतोरणैः ५४ यत्रचास्तेमहाविष्णुः श्रियानारा
यणीरमा यस्यादर्शनमात्रेणस्यादाभवतिमानवः ५५ नदीपुण्यजलात्तत्रतिष्ठत्यनुपमाशुभा तस्मिन्पुरेह
वत्स्यामिकोटीश्वरस्तीरितः ५६ देवीचास्तेमहाकालिकराजास्याभयंकरा राक्षसेंद्रसमाक्रम्यकामदा
पूजिताःनृणां ५७ महानदीमहावेगाकृष्णापापहराशुभा तस्यास्तीरंमहापुण्यंपूर्णोलयमितिस्मृतं ५८
तीर्थंतस्मिन्निवत्स्येहंदक्षिणद्वारमाश्रितः तत्रस्नात्वासकृद्दृष्ट्वामांगुरुंजगतोनघ ५९ राजसूयफलंप्राप्य
मोदतेदिविदेववत् कृष्णायांपुण्यतोयायांतत्तीर्थंपरमुत्तमं ६० द्वारमूलंयतस्तस्यक्षेत्रराजस्यनारद या
वंतिसंतितीर्थानिक्षेत्राणित्रिभुवनत्रयं ६१ यांतिपूर्णोलयंतानिगुरोकन्यागतेसति पूर्वद्वारंतुभगवान्स्वय

मास्तेत्रिविक्रमः ६२ महत्यागदयायुक्तोलोकत्रयरिरक्षया सुरन्महामणिव्रातखचितामलमौलियुक् ६३
निजायुधधरोदेवस्तत्क्षेत्रंप्रियमात्मनः कृत्वातुदृष्टतोराजन्नास्तेपूर्वमुखःप्रभुः ६४ तत्रपुष्करणीरम्यासर्व
पापप्रणाशिनि देवस्यचोत्तरेभागेतिष्ठत्यमरवंदिता ६५ तत्रस्नात्वासकृन्मर्त्यः क्रांतलोकत्रयंहरिं सर्वान्का
मानवाप्येहश्वेतद्वीपेप्रमोदते ६६ कार्तिक्यांपौर्णिमास्यांचवैशाख्यांचपरंतप दर्शनान्मुक्तिदोनृणांरमानाथ
स्त्रिविक्रमः ६७ श्रीनृसिंहोमहासिंहोहिरण्यकशिपोरिपुः उत्तरद्वारमाश्रित्यतिष्ठत्यमरवंदितः ६८ माहा
त्म्यकथितंतस्यमयापूर्वंतवानघ बहिर्द्वाराणिचत्वारिकथितानिमयातव ६९ तेषांस्मरणमात्रेणयोतिपापा
निभस्मसात् कदाचित्कृष्णजोब्रह्मन्नृषिर्लोकमुपागतः ७० गंगातीरंसमागच्छन्संशास्तोगजसाह्वयं रा
जानमर्ह्यांचक्रेकुंतीपुत्रोयुधिष्ठिरः ७१ उपविष्टमृषिंप्राहउपसंगम्यधर्मवित् पश्यन्दह्यमानेनहृदाग्ना
त्मिरन्वितः ७२ युधिष्ठिरउवाच भगवन्सर्वधर्मज्ञसर्वशास्त्रविशारद नातातंचिंतयेविद्धितभुवन
त्रये ७३ अतःपृच्छामहेब्रह्मन्प्रसादंकर्तुमर्हसि पितरोभ्रातरःपुत्राज्ञातयः सुहृदस्तथा ७४ गुरवोगुरुपु
त्राश्चहताःपापात्मनामया तासांतुनरनाथानांस्त्रीणांशोकोऽतिदुस्त्यजः ७५ कान्मान्नयेत्तनरकान्मृतद्रुह
मसत्तमं अहोपापेमतिर्ब्रह्मन्नुपश्यतांमेऽतिदुस्त्यजा ७६ देहात्मबुद्धिमाश्रित्यबहवोहिंसिताःप्रभो पुण्यक्षेत्रेकु

क्षेत्रेपापंपापरतेनमे ७७ हतंतस्यविनाशायकिंकार्यंवदतन्मुने अश्वमेधसहस्रेणनपापंमेविनश्यति ७८
कर्मणाकर्मनाशस्तुनदृष्टोनश्रुतोपिवा अतःपतंतंनरकेकृपयोद्धर्तुमर्हसि ७९ दीनानांमादृशांलोकेधर्मी
दोदीनचेतसां त्वादृशःशरणंब्रह्मन्जंतूनांकेवलाश्रयः ८० शंकरउवाच एवंपृष्टोधर्मराजाकुंभयोनिर्महा
मुनिः उवाचतंप्रहृष्टात्मानारायणपरोमुनिः ८१ राजन्साधुकृतवच्चिंतांकर्तुतेनार्हसिप्रभो विद्यमानेहृषीके
शेकिंभयंदुरितांतिके ८२ वैष्णवस्यमहाबुद्धेर्दर्शनाद्यांतिसंक्षयं पापानिकोटिशोराजन्नूतस्यचिंतातुनिः
फला ८३ यथारवेर्दर्शनेननतमोयातिविशीर्णतां तथातेदर्शनाद्राजन्नूतस्यचिंतातुनिःफला ८४ गंगाप्रवाह
रोधस्तुकेनचिच्छ्रियतेयदि हरिभक्तस्यपापेननिरोधोस्तिकहिंचित् ८५ पापराशिषुमग्नोपिनतत्संगीह
रिःप्रियः पद्मपत्रंयथानीरेस्थितंतेननलिप्यते ८६ नत्वहंताचकर्ताचजंतूनांनैवरक्षकः रक्षकःपोषकःकर्ता
हंतासपुरुषोमहान् ८७ पाकस्थंयथादर्वीसूपदोषविवर्जिता एवंयदिष्यातिष्ठन्पुण्यपापैर्नलिप्यते
८८ ज्ञानभक्तिविहीनोपिपरप्रेरणतः खलः गृणन्नयन्नाममुक्तः स्यात्किमुतत्प्रवणःसदा ८९ प्रायश्चित्तवि
धिस्तात व्यर्थस्याद्धरिकिंकरे अश्वमेधविधिर्यद्वद्राजन्योन्यत्रनिष्फलः ९० विष्णुभक्तस्यतेराजन्दर्शनात्पा
पराशयः यांतिनाशंकुतःप्रश्नोलोकसंग्रहणायते ९१ अथापिवक्ष्येराजर्षेलोकानुग्रहकाम्यया यत्रचास्तेर

मानाथःशंखपाणिर्द्विबाहुकः ९२ कटिसूत्रस्तहस्तश्चवक्त्रकेशोदिगंबरः मकराभ्यांकुंडलाभ्यांलस श्री
मुखपंकजः ९३ सुवक्षःपीनवृत्तांसाभ्यांराजितोरुद्वयोविभुः मुनिनापुंडरीकेणक्षेत्रपालेनसंयुतः ९४
पद्मयोर्गोयष्टिधरस्त्रिदानंदैकविग्रहः मुग्धस्मितावलोकेनचित्तन्वन्सज्जनेप्सितं ९५ तत्रगच्छकुरुश्रेष्ठय
ष्टिंसिमहोदयं तस्यदर्शनमात्रेणसर्वपापक्षयोभवेत् ९६ ब्रह्मघ्नोवासुरापोवागुरुहापित्रृहातथा मा
तृहात्रातृहाचापिमुच्यतेतस्यदर्शनात् ९७ रंतितस्यवचःश्रुत्वाऋषेःसज्जगतांपतिः जहोशोकंतमामं
त्र्यजगामाशेषदर्शनः ९८ ततोधौम्यादिभिर्विप्रैर्वृतःपरिवारितः पौंडरीकंमहापुण्यंययोयत्रस्त्रियः
पतिः ९९ स्नात्वासर्वोत्तमेतीर्थेदत्त्वादेवंचविष्ठलं कृत्वादानादिकंराजाविष्णुरूपः स्वपुरंगतः १०० त्रिपमा
णस्यदेवर्षेक्षेत्रमेतत्परायणं पतितोपिसृतोयत्रगच्छेत्पुनर्भवं २ योनजानातिवैमर्त्यः क्षेत्रमेतन्म
हाफलं सगच्छत्यपरंक्षेत्रंहित्वेतन्मुक्तिदंभुवि ३ स्मशानेवाथरथ्यायांगृहेवाशुद्धिदस्थले पुरीषमूत्रमध्ये
वासूतिकागारएववा ४ भूमौवातोयमध्येवाशून्यरिक्षेतथापिवा खट्वायांमंचकेवापिकुशोपरिगृहोपरि
५ किंबहूक्तेनदेवर्षेचांगुलस्यापिवक्ष्मनि मुक्तादेहंव्रजेल्लोकंविष्णोरेवनसंशयः॥१०६॥ रतिश्रीस्कंद
पुराणेउत्तरसंहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेदशमोध्यायः॥१०॥ ॥श्रीशंकरउवाच॥ ॥

स्मिन्क्षेत्रेमहापुण्येविष्णुतिष्ठत्यसंशयं तत्रपिंडप्रदानेनमुक्तिंयांतिपितामहा १ गंगायांपिंडदानेनउद्दिष्ट
स्यभवेद्गतिः कुब्जानामिहसप्तानांगतिर्मुनिभिरीरिता २ विष्णोरुत्तरभागेतुशतहस्तप्रमाणतः नृसिंहो
श्वत्थरूपेणतिष्ठत्यपरवंदितः ३ अनुष्टुप्तस्यमंत्रस्यध्येयोदेवःसनातनः द्वित्रिराज्रुजसंयुक्तोदिव्यायुधसम
न्वितः ४ प्रज्ञादत्तमुखेभक्तिर्भजनीयपदांबुजः भूषणैर्भूषितोदिव्यैर्भक्तकल्पद्रुमःस्वयं ५ रक्षकस्त्वरथां
गेनक्षेत्रस्योपावितात्मनां तस्यचोत्तरभागेतु तीर्थंपापप्रणाशनं ६ कुंब्जास्थंमहाविष्णोः स्थापितेयत्र
कुंडले तत्रस्नात्वासकृन्मर्त्यो दक्षादेवंन्नकेसरी ७ राजसूयस्ययज्ञस्यफलंप्राप्नोतिमानवः नारसिंहस्य
देवस्यपंचहस्तप्रमाणतः ८ परितोऽघहरंक्षेत्रंसर्वसिद्धिप्रदंनृणां संमार्जनोपलेपाभ्यांतस्थानंमंड्यंति
ये ९ तैरर्चितोमहाविष्णुर्जन्मकोटिषुनारद नतेषापुनरावृत्तिः कल्पकोटिशतैरपि १० पितॄनुद्दिश्ययत्किं
चिद्दीयतेतत्रकेनचित् संतुष्टःपितरस्तस्य ब्रह्मलोकेवसंतिहि ११ देवकन्यामहाभागानारसिंहंसमाप्यहं
नीराजनैरर्चयंतिकोटिशः पद्मलोचनाः १२ प्राणांस्त्यजतियोमर्त्यस्तस्यदेवस्यसन्निधौ कुब्जकोटिंसमुद्धृत्य
सयांतिहरिसात्मतां १३ प्रयागमरणाद्गंगाजन्मतिस्तत्रविशिष्यते मृतस्यतत्रमोक्षस्याकलंतस्यान्नमुच्यते १४
मंडूकःकाश्रिराश्रित्यवृक्षमूलंपुरास्थितः दैवात्प्राप्तमृदंजलेनूनान्यदेशंसगच्छति १५ मृतस्तत्रैवकालेनशी

नहीनोपिनारद उर्ध्वंलोकमासाद्यमादतेस्थानिनोयथा १६ मेहनादीनितत्रैवक्रियंतेऽजनिनरैः तेयांतिन
रकंघोरंयावदिंद्राश्चतुर्दश १७ देवस्यपश्चिमेभागेपद्मतीर्थंमहाफलं करस्थंपद्मनाभेनस्थापितंतत्रपंकजं
१८ वधायदैत्यराजस्यत्रिदंशस्योरात्मनः तत्तीर्थंपरमंपुण्यंप्रियंविष्णोर्विशेषतः १९ विनाधानाद्विनाशा
नान्मोक्षदंपापिनामपि नरेणसहतत्रास्तेहरिर्नारायणः स्वयं २० तत्रस्नात्वानुवारेराजसूयफलंलभे
त् ब्रह्मबंधुः सुरामर्षी ब्रह्महाभोगुरुतल्पकः २१ स्तेयीसुरापोमित्रध्रुक्सर्वपापयुतः खलः वृषलीपति
रत्यगोदर्शनात्पापदोनृणां २२ तस्यपापानिसर्वाणिचित्रगुप्तननारद लिखितानिपठेनेक्षत्पश्यन्नपिमना
गपि २३ कदाचित्पर्यटन्पापः काननेवृकुशः खलः श्वभिश्चतुर्भिः संयुक्तोबबाधेपथिकान्बहून् २४ क्षुत्
श्रमार्दितःश्रांतोमध्यान्हानपपीडितः जलमाकांक्षमाणोसोवगात्तीर्थमुत्तमं २५ निमग्नःसेद्दुशांगोपपो
तोयंसुनिर्मलं पपिवान्स्वत्थमूलंतुक्षणार्धंमुनिपुंगव २६ श्वभिर्वृतोगतोगेहंभारभूतोभुवोनिशं तस्यैवं
रममाणस्यवर्षपूगान्बहूनथ २७ आगतोमत्पुरत्पुरः कराजरमसोविभुः चित्रगुप्तः सकान्यामानुप्रेषयन्
जगृहेपटं २८ निरीक्ष्यमाणोनापश्येदेकमप्यक्षरंविभुः ततोमग्नमनाब्रह्मन्जगामस्वामिनोंतिकं २९ विज्ञा
पयामासयमंवेपमानः कृतांजलिः चित्रगुप्तउवाच सुरामर्षणाकृतंपापंलिखितंहिमयापटे ३० नांतंतस्यक्विजाने

हंगणयन्नवदात्रया संप्रेष्यकिंकरांस्तस्यमृत्युकालेमयापदः ३१ निरीक्षितोमहाराजरेखामात्रेनदृश्यते द
दाहंदुर्मनाभूत्वाभवदंतिकमागतः ३२ लिखितस्यमयातस्यपापस्यपरिमार्जनं कंतकेनप्रकारेणप्रभोलंवतु
महसि ३३ नज्ञातंतवलोकेस्मिन्विदेतत्सुचराचरे शंकरउवाच इतिप्रेक्षः प्रेतनाथः चित्रगुप्तेनधीमता ३४ वि
चार्यकिंचितंप्राहस्मृत्वाविष्णुंजगद्गुरुं यमउवाच चित्रगुप्तमहाभागलिखितानित्वयापटे ३५ अक्षराणिनदृश्यं
तेपुनःकिंचिन्निरीक्ष्यतां ॐमित्यादेशमादायपुनरेवमहामतिः ३६ दर्शितवदनेनलिखितंतन्महामुते अ
नेनयत्कृतंपापंजन्मांतरकृतंतथा ३७ तत्सर्वंविलयंयातंब्रह्महत्यादिकंबहु यस्मात्स्नातोमहातीर्थेन्नले त
स्यसुनिर्मले ३९ एतदृष्ट्वामहाबाहुश्चित्रगुप्तोपिनारद उपसंगम्यलोकेशमुवाचातीवविस्मितः ३९ मया
पत्रितंतत्रनास्तितद्विबुधर्षभ केनापिलिखितंचान्यद्दृश्यतेश्रूयतांप्रभो ४० अनेनयत्कृतंपापंब्रह्महत्यादि
कंमहत् तत्सर्वंविलयंप्राप्तंजन्मांतरकृतंतथा ४१ यस्मात्स्नातोमहापुण्येपश्चतीर्थेसुनिर्मले दृष्ट्वातत्कोटु
कंराजन्नूत्वांदृष्टुमिहचागतः ४२ वक्तुमर्हसितद्ब्रूहिप्रसन्नश्चसमानघ कृत्तत्तीर्थमहापुण्यंनदृष्टंनश्रुतंपुरा
४३ यत्रस्नात्वासकृन्मर्त्योमुच्यतेपापकोटिभिः सकृत्स्नात्वामहादेवलिखितान्यक्षराणिहि ४४ संमार्जितानिमे
तस्यप्रभावंवक्तुमर्हसि यमउवाच पंचाशत्कोटिविस्तीर्णमंडलेस्मिन्मुवस्तले ४५ उत्तमंदंडकारण्यंयत्रजानं

तिपापिनः तस्मात्कोटिगुणंपुण्यंगोतम्यास्तीरमुत्तमं ४६ तस्मात्कोटिगुणंपुण्यंपौंडरीकंमहाफलं यत्रास्ते
भगवान्साक्षान्मायूरस्त्रग्धरोविभुः ४७ यस्यभीषाचातिवायुस्तपत्यर्कोमहातपाः वर्षतींद्रस्त्रिलोकेशोवन्हि
र्दहतियज्ञयात् ४८ सजत्सशेषलोकान्वैब्रह्मलोकपतिःप्रभुः हरत्यंतेहरोक्ष्मासहितालोकपालकाः ४९ स्वा
धिकारेषुवर्ततेसंयताः सानुगास्तथा सविष्णुरखिलेशोवैयत्रतिष्ठत्यहंचलः ५० अनुग्रहायभूतानांमानु
षंलोकमास्थितः तस्यपश्चिमभागेतुतीर्थमेतन्महाफलं ५१ तिष्ठत्यशेषपापानांनाशकंनाममात्रतः तत्र
स्नात्वासुरामोपिमोचितःपातकैरिह ५२ पद्मतीर्थेनरस्नात्वा दृष्ट्वातोनरमाधवो पापाक्षराणितस्यापि संमा
र्जतिहरिःस्वयं ५३ चित्रगुप्तसमंतस्यतीर्थंभूमोनदृश्यते शंकरउवाच श्रूयतांमस्यतद्वाक्यंचित्रगुप्तः सु
विस्मितः ५४ आमंत्र्यवचनमस्यत्वजगामस्वनिकेतनं तस्मान्नारदतत्तीर्थंसेव्यंसर्वैर्नरैः सदा ५५ एकदंष्ट्र
स्तेदैत्यस्त्रेतायांतुद्विदंष्ट्रकः त्रिदंष्ट्रोद्वापरयुगेऽधरोतिबलःखलः ५६ एकदंष्ट्रोहतोब्रह्मन्नृहरिणासिंहरू
पिणा पार्ष्णिग्राहोमहासत्वोहिरण्यकशिपोस्तथा ५७ तृयाद्विदंष्ट्रोनिहतस्त्रेतायांरामसायकैः रावणस्यसुतो
ब्रह्मन्नतिकायइतीरितः ५८ सत्रिदंष्ट्रोतिबलवान्स्वरूपमनुस्मरन् मृगयन्नगतः क्रुद्धोयत्रास्तेदैत्यसूदनः
५९ दृष्ट्वाक्षेत्रेमहाविष्णुंक्रोधविकलितेक्षणः उवाचपुरुषंवाक्यंसिंहपोतंयथाशिवा ६० कृतागस्तंमंद

त्मनूकिंचित्संदर्शयाम्यहं गुदेनहिहंतादेत्यामदीयाभवतापुरा ६१ अद्यलांनिहनिष्यामिसाधुवस्थितमप्य
हं इत्युत्कागदयागुर्व्योताड्यामासकेचावं ६२ कश्चित्स्थंशिक्यमद्यापिदृश्यतेगदयार्दितं तदाविष्वक्सेनः क्रुद्धो
भगवान्दैत्यदर्पहा ६३ दक्षिणेनकरेणारिंताड्यामासचीलया ताडितस्तेनदुष्टात्मावमन्मूर्तंपपातह ६४
मृतश्चत्रिदशैर्विष्णुरीडितःपुष्पवृष्टिभिः अद्यापिदृश्यतेशिक्यमग्ननारदवामतः ६५ मंत्राक्षराणिदेव
र्षेदृश्यंतेतत्स्ववक्षसि प्रीत्याधारतंमंत्रंभगवानात्मनःप्रियं ६६ ममोपदिष्टवान्मंत्रंरूपयामयिमाधवः
प्रासादात्तस्यदेवस्यजानेहंवैनचापरः ६७ नारदउवाच भगवन्देवदेवेशरूपांकुरुमयीश्वर वक्तुमर्हसिमेमं
त्रंयेनाहंडुत्तरंतरे ६८ मादृशेषुप्रसन्नेषुतादृशानांमहात्मनां रूपाबुद्धिःरूपावूनांसतांवृत्तिस्यंसदा
६९ शंकरउवाच नवाच्यःसर्वथामंत्रोगुह्यानांगुह्यमुत्तमं अभक्तानांमहाविष्णोर्यश्चाप्यन्युपासते ७०
त्वंमेप्रियतमोनित्यंभक्तकैठभसूदने अतोवक्ष्यामितंमंत्रंगोप्यंसर्वात्मनालया ७१ स्पर्शादंसत्यनामादं
षष्ठषष्ठंसदीर्घकं संणंषष्ठादिनंत्यंतंसमारंतंविदुर्बुधाः ७२ ऋषिःकृष्णोमहाविष्णुदेवतातस्यनारद म
हस्त्रवर्तनेनेशाःप्रसन्नःस्यान्नसंशयः ७३ मंत्राणांपरमोमंत्रःसर्वसिद्धिप्रदायकः स्नात्वातीर्थमहानद्यांव
कृत्वाचावश्यकंमुने ७४ नत्वादेवंमहाविष्णुंशतमावर्तयन्मुने विधूयसर्वपापानियातिमोक्षंनसंशयः ७५

अहमावर्तयाम्यंगसन्निधौतस्यनित्यदा मंत्रराजंमहाविष्णोः प्रीत्यर्थेपरमादरात् ७६ दक्षिणद्वारमा
श्रित्यतिष्ठतिनारद तत्सन्निधौमहामंत्रंजपसिद्धिमवाप्नुयात् ७७ तीर्थयात्रांप्रकुर्वाणोवज्रदेशमहापशा
भैमीमनुव्रजन्नूदक्षात्रराजंमहाद्रुतं ७८ भक्तिमान्परमोविष्णौ तीर्थस्नात्वासमाहितः दृष्ट्वाविष्णुंस
क्षरंसविस्मयंपरमंययौ ७९ सर्वज्ञोपिहिनाविंदद्दक्षराणियदार्वतः ज्ञातुंतानिमहाबाहुस्तपस्तेपेसुड
ष्करं ८० मासमेकंनिराहारोनिश्वासरहितोमुने ऊर्ध्वबाहुर्जितारातिरेकांगुष्ठेनसंस्थितः ८१ तदाविश्वे
श्वरस्तुष्टोमहाविष्णुर्महामुने आबोधत्परमंमंत्रंबज्रस्यरूपयाविभुः ८२ तदाप्रभृतिसोप्येनंमंत्रमेवजजा
पह पुत्रकामोमहाभागोरुक्मिणीपतिदेवतां ८३ स्नात्वाविष्णुर्महाबाहुस्तस्यास्तन्मंत्रमादिशत् जपात्स
पंचरात्रिणपुत्रंतेप्रभोमहाप्रभं ८४ प्रद्युम्नंदग्धदेहंमेक्रोधदृष्ट्यामहामुने तस्मात्वमपिदेवर्षेजपमंत्रंसमा
हितः॥८५॥इतिश्रीस्कंदपुराणउत्तरसंहितायांपांडुरंगमाहात्म्येउमामहेश्वरसंवादेएकादशोध्यायः॥११॥
श्रीशंकरउवाच॥त्रिपुरैर्बाध्यमानानांप्रजानांशांचिकीर्षया विज्ञापितोदेवगणैर्गृहीतंकार्मुकंमया १ शस्त्रा
णिविज्यकृत्वाणिगृहीतानितथानघ पुरत्रयंतदावीक्ष्यसज्जंकृत्वामहाधनुः २ संदधेचणमत्युग्रंतदास्वे
दोपतद्भुवि मदंगस्वेदवार्यंगनिम्नगासीदघापहा ३ भैमीनाममहाभागासीमस्यममकन्यका पुनंतीवा

रिणाव्योकंक्षेत्रमेतदुपागतं ४ तांचकक्षोत्समालोक्यदृक्षालोकभयंकरीं चुक्रुशुःक्षेत्रसीमायांप्राणिनः
स्थिरजंगमाः ५ भयत्रस्तामहाभागभैरवंभीमनिःस्वनं प्रोचुःपांजलयोभीताः यथाविष्णुंदिवौकसः ६ क्षे
त्रस्योत्तरभागेतुप्रविष्टासामहानदी स्थातुंनशक्यतेस्माभिः कृपामःक्षेत्रपालक ७ रतिविस्तापितस्तत्रभै
रवोभयनाशनः क्रुद्धोजगामतंदेवांदंडमुद्यम्यनारद ८ वेगात्सेनवदुत्पत्ययत्रास्तेसामहानदी तांदृक्षा
क्षेत्रपालोसौचुकोपचननादच ९ उवाचघोरयाद्दृनतांनदींनागभूषणः तिष्ठतिष्ठत्वयाक्षेत्रंनप्रवेष्टव्य
मंगने १० निरीक्ष्यतांसकक्षोलांबिभ्यंतीक्षेत्रवासिनः मांप्रोवाचमहाविष्णुःकुप्यतीसमहाप्रभुः ११
रत्नुल्कासामहागंगाभीतातस्यमहात्मनः अतिस्तमहाभागातत्रभैरवभीषणात् १२ विचार्यकार्यंसा
तत्रभगवंतंसुरेश्वरं अस्तोषीदादिपुरुषंभेमीभवभयापहा १३ भीमोवाच येनेदंनिर्मितंविश्वंतत्रतिष्ठत्य
चंचलं यस्मिंनंतेलयेयातिसविष्णुर्मेपरागतिः १४ योगजंदग्यहृयस्तंपीडितंशरणागतं ररक्षरूपयाप्य
त्यसविष्णुर्मेपरागतिः १५ यत्पादनिसृतागंगागांगतांमेपित्ताशिवः दधारशिरसाभक्त्यासविष्णुर्मेपरा
गतिः १६ दुर्जनेरग्निभूतायाः पांचाल्याः रूपयाविभुः मानंररक्षमानिन्याः सविष्णोर्मेपरागतिः १७ भी
ताहं शरणंप्राप्ता कृगतिर्मेजनार्दन गतिर्भग्नाममविभोत्रस्ताहंक्षेत्रपालकात् १८ त्रातुमर्हसिमंदासांप्र

णतार्तिहन् चंकरुवाच एवंस्तुतोपांडुरंगोभेम्याप्रणतयाविभुः १९ रूपयाप्रणतांप्राहप्रपन्नभयना
शन श्रीभगवानुवाच एहिलंदेवीनाभीतिंकर्तुमर्हसिशोभने २० तावद्भवंभवेत्स्मिन्वैयावन्नोवेत्तिमांपरं आ
ज्ञेयामेममक्षेत्रंसंरक्षयितुमर्हसि २१ स्नानात्पानात्तथादानात्कुरुपापानिभस्मसात् मत्क्षेत्रस्थामहा
भागेगंगायाश्चशताधिका २२ भवभस्मांगजापित्तंमत्प्रासादाद्यपहा रत्नुल्कासामहाभागाहर्षोन्नि
म्नतरंगिणी २३ क्षणादाक्षयत्क्षेत्रंज्याभूतात्तस्यनारद यत्रप्रविशासादेवीतत्तीर्थंसुमहाफलं २४
नारसिंहास्यभीत्रास्यप्रियंपापंहरंपरं तत्प्रभास्यतीर्थानियावद्देवीसरस्वती २५ संतितिष्ठंतीर्थराजोम
ध्येनारदभासते यत्रसाक्षान्महाविष्णुस्तिष्ठत्यमरवंदितः २६ तस्यदक्षिणभागेतुपुन्निंसुमनोहरं य
त्रतस्थामुक्तकेशीततोऽभेवरान्यभोः २७ पूर्वमासीद्गोपिकासानंदगोपस्यगोकुले हरःप्रियामहाभागा
रूपलावण्यशालिनी २८ तालवानस्थितंविष्णुमेत्यतेपेमहत्तपः प्रसन्नोभगवांस्तस्यपुरस्तस्थेसनात
नः २९ तंदृष्ट्वासूर्यसंकाशंपांडुरंगंत्रजांगना जग्राहपादौदेवर्षेकामकश्मलचेतसा ३० मुक्तवस्त्रांमुक्त
केशीविमुक्तस्रग्विभूषणां निरीक्ष्यछंदयामासवरेणवरदेश्वरः ३१ वव्रेसापिवरंतस्यसमीपेस्थितिमात्म
नः स्वदर्शनेपरांसिद्धिं मनुष्याणामहात्मनां ३२ तस्यैकामवरंदत्वास्थापयामासतांप्रभुः ईशान्येक्षेत्रराज

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

स्यंकचिदद्यापित्तृश्यते ३३ करांघ्र्यांघीडितेनस्यादृश्यतेद्यापित्तत्पदे कथितंसर्वमेतत्तेयत्पृष्टंहिलयानघ
३४ तीर्थक्षेत्रदेवतानांमाहात्म्यंपाद्मसंभव नवक्तव्यंखलायेतन्ननघगयडुरात्मने ३५ नावेदवायमंदाय
नैवभूतात्ममानिने वक्तव्यंपरमंगुह्यंसाधूनांसाधुसेविनां ३६ वेदवानांकृपालूनांसर्वभूतानुकंपिनां ना
रदउवाच भवतानुगृहीतोस्मिकृतार्थोस्मिजगत्पते ३७ यत्त्वयादर्शितोमह्यंक्षेत्रराजसुदुर्लभः सूतउ
वाच इत्युक्तांपरिक्रम्यप्रणम्यचपुनःपुनः ३८ अनुज्ञातोनारदस्तुययौक्षेत्रंमहामुनिः स्नात्वातीर्थमहा
पुण्ये दृष्ट्वादेवंतुविष्ठलं ३९ दक्षिणद्वारमाश्रित्यतिष्ठत्यद्यापिनारदः॥४०॥इतिश्रीस्कंदपुराणेउत्तरसंहि
तायांश्रीपांडुरंगमाहात्म्येउमामहेश्वरसंवादेद्वादशोध्यायः॥१२॥ श्रीगोपालकृष्णमुरलिधरार्पणमस्तु